श्री

प्रश्नोपनिषत्

अथर्ववेदीयोपनिषच्छान्तिपाठ —

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ॥
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥
ओं शान्तिश्शान्तिश्शान्तिः]

श्री

श्री श्रीनिवासपरब्रह्मणे नमः

येनोपनिषदां भाष्यं रामानुजमतानुगम् ।
रम्यं कृतं प्रपद्ये तं रङ्गरामानुजं मुनिम् ॥

श्रीरङ्गरामानुजमुनिविरचित प्रकाशिकाभिधानं भाष्यम् ।

अतसीगुच्छसच्छायमञ्चितोरस्स्थलं श्रिया ।
अञ्जनाचलशृङ्गारमञ्जलिर्मम गाहताम् ॥
व्यासं लक्ष्मणयोगीन्द्रं प्रणम्यान्यान् गुरूनपि ।
क्रमात् प्रश्नोपनिषदं व्याकरिष्ये यथामति ।

श्री

श्रीनिवासपरब्रह्मणे नमः ।

श्रीमद्भ्यो रङ्गरामानुजमहादेशिकेभ्यो नमः ।

उपनिषद्भाष्यपरिष्कारः

परं ब्रह्म योद्धुं मुनिं पिप्पलादं समेत्योपसेदुः सुकेशादयः षट् ।
कबन्ध्यादिकैस्तैः पर्यैः क्रमशः प्रमेयैरपृच्छन् स च प्रत्युवाच ॥

प्रथमः प्रश्नः

हरिः ओम् । सुकेशा च भारद्वाजः, शैव्यश्च सत्यकामः, सौर्यायणी च गार्ग्यः, कौसल्यश्चाश्वलायनो भार्गवो वैदर्भिः कबन्धी कात्यायनः ते हैते ब्रह्मपरा ब्रह्मनिष्ठाः परं ब्रह्मान्वेषमाणाः, 'एष ह वै तत्

सुकेशा च भारद्वाजः शैव्यश्च सत्यकामः सौर्यायणी च गार्ग्यः कौसल्यश्चाऽऽश्वलायनो भार्गवो वैदर्भिः कबन्धी कात्यायनः । भरद्वाजस्यापत्यं पुमान् भारद्वाजः, नामतः सुकेशा ; शिबेरपत्यं शैव्यः, नामतः सत्यकामः ; सूर्यायणस्यापत्यं सौर्यायणिः, ईकारश्छान्दसः–गोत्रतो गार्ग्यः; कौसल्यो नामतः आ(अ?)श्वलस्यापत्यमाश्वलायनः ; भार्गवो गोत्रतः, विदर्भस्यापत्यं वैदर्भिः ; कबन्धी नामतः कात्यायनो गोत्रतः । ते हैते ब्रह्मपरा ब्रह्मनिष्ठाः परं ब्रह्मान्वेषमाणाः। ते ह प्रसिद्धाः । एते उक्ताः सुकेशसत्यकामसौर्यायणिकौसल्यभार्गवकबन्धिनः षडृषयः । ब्रह्मपराः वेदपराः ; वेदैकशरणाः इत्यर्थः । ब्रह्मनिष्ठाः वेदार्थतात्पर्यवन्तः । यद्वा ब्रह्मपराः ब्रह्मज्ञानतत्पराः । ब्रह्मनिष्ठाः तपोनिष्ठाः । 'वेदस्तत्त्वं तपो ब्रह्म'इत्युक्तेः । परं ब्रह्म । परम् उत्कृष्टं निरुपचरितम् ब्रह्म स्वरूपतो गुणतश्च बृहद्भूतं वस्तु अन्वेषमाणाः जिज्ञासमाना इत्यर्थः । एष ह वै तत् सर्वं वक्ष्यतीति ते ह समित्पाणयो भगवन्तं पिप्पलादमुपसन्नाः ॥ हस्तेन्द्रः

---

१. सुकेशादिकबन्ध्यन्ताःषट् प्रथमं निर्दिष्टाः। तेषामेव व्युत्क्रमेण कबन्ध्यादिसुकेशान्तानां षट् प्रश्नाः षट्सु खण्डेषूपक्षिप्य समाधीयन्ते। अत एव प्रश्नेति नाम । सुकेशा इति दीर्घश्छान्दसः ।

सर्वं वक्ष्यति' इति ते ह समित्पाणयो भगवन्तं पिप्पलादमुपसन्नाः ॥

तान् ह स ऋषिरुवाच, 'भूय एव तपसा ब्रह्मचर्येण श्रद्धया संवत्सर [स]वत्स्यथ। यथाकामं प्रश्नान् पृच्छत(थ)। यदि विज्ञा-

---

प्रसिद्धौ। वैशब्दोऽवधारणे। एषः=अस्मद्बुद्धौ विपरिवर्तमानः परं *ब्रह्मवित्त्वेन प्रसिद्धः पिप्पलाद एव वण्णामस्माकं जिज्ञासितान् अर्थान्* वक्तुं प्रभवतीति पर्यालोच्य समिद्भाराद्युपायनपाणयः शास्त्रदृष्टेन विधिना पूज्यं पिप्पलादमुपगता इत्यर्थः ॥ १ ॥

तान् ह स ऋषिरुवाच। स्पष्टोऽर्थः। **भूय एव तपसा ब्रह्मचर्येण श्रद्धया संवत्सरं वत्स्यथ। यथाकामं प्रश्नान् पृच्छत। यदि विज्ञास्यामः, सर्वं ह वो वक्ष्याम इति।** यद्यपि पूर्वमेव भवन्तस्तपोब्रह्मचर्यादिसंपन्नाः, तथाऽपि ब्रह्मविद्याग्रहणार्थं पुनरपि शरीरशोषणादिलक्षणतपसा योषित्स्मरणकीर्तनकेलिप्रेक्षणगुह्यभाषणसंकल्पाध्यवसायक्रियानिर्वृत्तिलक्षणाष्टविधमैथुनवर्जनरूपब्रह्मचर्येण आस्तिक्यबुद्धिलक्षणया श्रद्धया युक्तास्सन्तः संवत्सरमात्र(मत्र²) वासं करिष्यथ; वासं कुर्वन्त्विति यावत्। ततः स्वेच्छानुरोधेन प्रष्टव्यान् अर्थान् पृच्छत। यदि तान् अर्थान् वयं ज्ञास्यामः, तदा वञ्चनमन्तरेण सर्वं

---

२. संवत्स्यथ=अत्र संभूय वत्स्यथ। भाष्ये समुपसर्गरहितः पाठः। विधौ भविष्यत्प्रयोगः विधित्सितस्यावश्यंभावित्वात् ॥ स्मरणेत्यादि। द्र. धै. ग. स्व. ४-७३ स्मरणमित्यादिश्लोकः, "स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम्। सङ्कल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च ॥" इति।

स्यामः, सर्वं ह वो वक्ष्यामः' इति ॥ २ ॥

अथ कबन्धी कात्यायन उपेत्य पप्रच्छ, 'भगवन्! कुतो ह वा इमाः प्रजाः प्रजायन्ते' इति ॥ ३ ॥

तस्मै स होवाच-प्रजाकामो ह वै प्रजापतिः स तपोऽतप्यत।

वक्ष्यामः। यद्यस्मात्तु ज्ञातृत्वनिश्चयाभावेन संवत्सरब्रह्मचर्यतपआदौ बहुक्लेशसाध्ये प्रवृत्तिर्न युष्मभ्यं रोचते, तदा सुखेन गन्तव्यमिति भाव। ततश्च गुरोर्ज्ञातृत्वपरीक्षामन्तरेणैव शुश्रूषा कार्येत्ययमर्थः शिक्षितो भवति। तथा गुरोरपि शिष्यसंग्रहे नातीवाऽऽदरः कर्तव्य इत्यर्थश्च सूचित.॥२॥

अथ कबन्धी कात्यायन उपेत्य पप्रच्छ। संवत्सरवासानन्तरमन्यैरनुज्ञात. कबन्धी पिप्पलादस्य समीपं यथाविधि उपगम्य पप्रच्छ। किमिति-**भगवन् कुतो ह वा इमाः प्रजाः प्रजायन्त इति।** स्पष्टोऽर्थ ॥३

तस्मै स होवाच। एवं पृष्टवते कबन्धिने पिप्पलाद उवाच। **प्रजाकामो ह वै प्रजापतिः स तपोऽतप्यत।** अत्र प्रजापतिशब्दो ब्रह्मपर.। अस्य कारणवाचयत्वात्। व्यासार्यैः सर्वव्याख्यानाधिकरणेऽस्त्य-प्रजापतिशब्दस्य ब्रह्मपरत्वस्य समर्थितत्वात। सः प्रसिद्ध प्रजापतिः

संवत्सरब्रह्मचर्यतपआदावित्यत्र संवत्सरतपोब्रह्मचर्यादाविति पाठस्स्यात्।

३. कुत इति कारणप्रश्नः। अत्र सृष्टिप्रयोजनमप्यर्थात् पृष्टमन्तव्यम्, उत्तरत्र एतत्प्रश्ने भोगापवर्गरूपप्रयोजनविवरणात्। अचेतनं चेत् अवशेन स्वयं परिणमेत्, तत्र प्रयोजनं न स्यादपि। इयं तु सृष्टिः प्रजापतिकर्तृकेति तत्स्वामिकानां प्रजानां भोगापवर्गौ फलत्वेन तेन संकल्पिताविति एतत्समाधिसारः॥

स तपस्तप्त्वा [स] मिथुनमुत्पादयते रयिश्च प्राणं चेति, एतौ मे बहुधा प्रजाः करिष्यत इति ॥ ४ ॥

आदित्यो ह वै प्राणो रयिरेव चन्द्रमाः। रयिर्वा एतत् सर्वं यन्मूर्तं चामूर्तं च। तस्मान्मूर्तिरेव रयिः ॥ ५ ॥

परमात्मा प्रजासृष्टिकामनया सृष्ट्यालोचनरूपं तपः अतप्यत कृतवान्। [स] तपस्तप्त्वा स मिथुनमुत्पादयते रयिं च प्राणं चेति। एवं सृष्ट्यं पर्यालोच्य रयिप्राणशब्दितप्रकृतिपुरुषाख्यं मिथुनमुत्पादितवानित्यर्थः। केनाभिप्रायेणेत्यत आह—**एतौ मे बहुधा प्रजाः करिष्यत इति**। प्रजाकामस्य ममैतौ रयिप्राणावनेकप्रकारान् प्राणिन उत्पादयिष्यत इत्यभिप्रायेणेत्यर्थः ॥

रयिप्राणशब्दार्थमाह—**आदित्यो ह वै प्राणो रयिरेव चन्द्रमाः**। आदत्त इत्यादित्यः—भोक्ता। स एव प्राण इत्यर्थः। [आदित्यशब्दितभोक्तृप्रतिद्वन्द्वितया भोग्यवर्गस्य चन्द्रत्वेन निर्देशः।] तस्य **प्राण**शब्दितत्वे हेतुः समनन्तरमेव वक्ष्यते। रयिरेव चन्द्रमा इत्यस्याभिप्रेतमर्थमाह—**रयिर्वा एतत् सर्वं यन्मूर्तं चामूर्तं च तस्मान्मूर्तिरेव रयिः**। मूर्तशब्देन पृथिव्यप्तेजांसि उच्यन्ते। अमूर्तशब्देन वाय्वन्तरिक्षे उच्येते। सर्वमपि भूतजातं **रयि** अन्नं भोग्यमित्यर्थः। तस्मात् **मूर्ति**शब्दितं पाञ्चभौतिकं शरीरं सर्वं भोग्यमेवेत्यर्थः॥

५. समनन्तरम् = षष्ठे वाक्ये। "द्वे वाव ब्रह्मणो रूपे" इति बृहदारण्यकानुरोधेनाह—मूर्तशब्देनेत्यादि। शरीरमिति। घटपटकाष्ठपाषाणादि सर्वमप्येकैकचेतनशरीरमेव, यथा अहल्याशिला। अत एव दधिभाण्डमोक्षदानम्॥

अथाऽऽदित्यः । उदयन् यत् प्राचीं दिशं प्रविशति तेन प्राच्यान् प्राणान् रश्मिषु सन्निधत्ते । यत् दक्षिणां यत् प्रतीचीं यदुदीचीं यदधो यदूर्ध्वं यदन्तरा दिशः, यत् सर्वं प्रकाशयति, तेन सर्वान् प्राणान् रश्मिषु सन्निधत्ते ॥ ६ ॥

अथाऽऽदित्यः । रयिनिरूपणानन्तरमादित्यः । वर्ण्यत इति शेषः । आदित्यशब्दितस्य भोक्तुः प्राणशब्दितत्वे हेतुरुच्यत इति यावत् । **उदयन् यत् प्राचीं दिशं प्रविशति तेन प्राच्यान् प्राणान् रश्मिषु संनिधत्ते । यद्दक्षिणां यत् प्रतीचीं यदुदीचीं यदधो यदूर्ध्वं यदन्तरा दिशो यत् सर्वं प्रकाशयति तेन सर्वान् प्राणान् रश्मिषु संनिधत्ते ॥** अयं जीवः सुषुप्तिस्थानात् प्रबुध्यमान एव सन् प्राचीं दक्षिणां प्रतीचीमुदीचीमधश्चोर्ध्वमन्तरादिशश्च सर्वं प्रकाशयन् तत्तद्दिग्वर्तीन्द्रियाणि धर्मभूतज्ञानाख्यरश्मिद्वारा बिभर्ति । तस्मात् स एव सर्वप्राणशब्दितेन्द्रियनिर्वोढृत्वात् प्राण इत्यर्थः । प्राचीं दिशं प्रविशति प्रकाशयति ; प्राच्यान् पदार्थान् उपलभत इति यावत् । **तेन**

अत्र—संवत्सरमासादेरुत्तरायणदक्षिणायनाद्युभयात्मकत्वात् रयिप्राणरूपप्रजापतित्वेन रूपणम् । आदित्यस्य चन्द्रमसश्च प्रत्येकमुभयात्मकत्वाभावात्प्रजापतित्वेन रूपणमुपेक्ष्यैकैकस्य प्राणरयिरूपेणैवोक्तिः। उदयन्नित्यारभ्य उदयत्येष सूर्य इत्यन्तं सूर्यस्यैव निरूपणं भवतु । उदयन्निति आदित्यस्य सर्वदिग्वर्तिप्राणशब्दितजीवसंबन्धकथनात् सर्वेषां देवयानगमनस्यालभ्यं प्रदर्शितं भवति । स एष इति सूर्यस्य परमात्मात्मकत्वमुच्यताम् । चन्द्रस्य सूर्यवद्विशेषेणानिरूपणमर्चिरादिगतिवचन एवेदमर्पयति । प्राकृतभोग्यवर्गस्य चन्द्रत्वेन रूपणमादित्यरूपितभोक्तृप्रतिद्वन्द्वित्वात् । चन्द्रस्य भोग्यतया आनुभ-

तस्माद्धेतो । *प्राच्यान्प्राणान् रश्मिषु सन्निधत्ते* पूर्वदिग्वर्तिपदार्थ-प्रकाशकान् चक्षुरादीन् प्राणान् धर्मभूतज्ञानाश्रयरश्मिमुखेनाधितिष्ठति, प्रेरयति । धर्मभूतज्ञानेन तदधिष्ठातृत्वलक्षणसन्निधानाभावे चक्षुरादिना करणेन रूपाद्युपलम्भो न स्यात् । चेतनानधिष्ठितस्य करणस्य कार्यासमर्थत्वादिति भाव । यद्दक्षिणा यत्प्रतीचीमित्यादौ, 'यद्दक्षिणा प्रविशति तेन दाक्षिणात्यान् प्राणान् रश्मिषु सन्निधत्ते, यत्प्रतीचीं प्रविशति तेन प्रतीच्यान् प्राणान् रश्मिषु सन्निधत्ते' इत्यादिशेष पूरणीय । लाघवार्थं प्रतिपर्याय तदनुक्ति । अत्र प्रजा सिसृक्षु परमात्मा प्रकृतिं पुरुष च ससर्जेति वक्तव्ये परोक्षरूपेण रयिप्राणशब्दाभ्या तदभिलाप, रयिप्राणयोश्चन्द्रादित्यशब्दाभ्यामभिलापश्च, 'परोक्षप्रिया इव हि देवा' [ऐत० १ ३] इति रीत्या रहस्यार्थस्य स्फुटतरोपदेशानर्हत्वसूचनार्थं ॥ ६ ॥

विकृत्वात् । 'तद्देवानामन्नम् । तं देवा भक्षयन्ति" इति सोमस्य भोग्यत्वश्रुतेश्च । आदित्यस्य प्राणरूपजीवाभेदे वक्ष्यमाणरीत्योपपन्ने सति च, जीवाधीनचैतन्यप्रसरात्मकप्रकाशशालिनोऽचेतनस्य भोग्यवर्गस्याऽऽदित्याधीनप्रकाशचन्द्रमस्साादृश्य युज्यते । रयिशब्दितैश्वर्यप्राप्तिदचान्द्रमसलोकगामिन, प्राणाख्यात्मनिष्ठस्य आदित्यप्राप्तिश्च समनन्तर वक्ष्यत इति च रयिप्राणयोश्चन्द्रादित्यात्मना रूपणम् । एव रयिप्रापकत्वादेव दक्षिणायनकृष्णपक्षरात्रीणा रयित्वम्, प्राणयाथात्म्यानुभावकत्वाच्चोत्तरायणशुक्लपक्षदिनाना प्राणत्वमिति । एतन्मयमपि कश्चिदादित्यप्राणाभेदकल्पने हेतु, यत् आदित्यस्योद्यत सर्वदिक्प्रवेशाच्च रश्मिषु सर्वदिक्प्राणसन्निधानञ्च

स एष वैश्वानरो विश्वरूपः प्राणोऽग्निरुदयते । तदेतदृचाऽभ्युक्तम् ॥ ७ ॥

आदित्यो ह वै प्राण इति प्राणशब्दनिर्दिष्टस्य भोक्तृवर्गस्योदयमानस्य परमात्मात्मकतामाह—**स एष वैश्वानरो विश्वरूपः प्राणोऽग्निरुदयते** । यः प्राक्प्रस्तुतः प्रजापतिशब्दितो विश्वे नराणां नेतृत्वेन **वैश्वानर**शब्दवाच्यः सर्वशरीरतया **विश्वरूप**शब्दितः अग्रनेतृत्वादिगुणयोगेनाग्निशब्दितः, **स एव** प्राक्प्रजापतिशब्दनिर्दिष्टः परमात्मा 'आदित्यो ह वै प्राणः' इति **प्राण**शब्दितभोक्तृरूपः सन् उदयत इत्यर्थः । अयं च मन्त्रो वैश्वानराधिकरणे परमात्मपरतया सिद्धवत्कृत्य **भगवता भाष्यकृता** व्यवहृतः । अत एवं व्याख्यातमिति द्रष्टव्यम् । **तदेतदृचाऽभ्युक्तम्** । तदेतद्ब्रह्माभिमुखीकृत्य ऋग्मन्त्रेणोक्तम् ॥ ७ ॥

च प्रसिद्धम्, तत् भाष्यदर्शितरीत्या जीवस्याप्यस्तीति । एवं च चन्द्रादित्यादिसृष्टिकथनमिहेति प्रकृतवाक्ये आदित्यचन्द्रयोर्निरूपणमेवास्तु, उत्तरश्लोकोत्तरदक्षिणायनशुक्लकृष्णपक्षादिदेवयानपितृयाणान्तर्गतनिरूपणवत् । विश्वरूपमिति श्लोकश्च सूर्यविषयकः, यथा संवत्सरविषयकः पञ्चपादमित्युपरितनश्लोकः-इत्येवं यद्यपि सुवचम्-

अथापि परमप्रकृतरयिप्राणयोरेव प्रागनिरूपितत्वादपेक्षिततन्निरूपणपरत्वमेव 'आदित्यो ह वा' इत्यादिवाक्यानां युक्तम् । रयिप्राणशब्दयोश्च चन्द्रादित्यादिमात्रपरतया संकोचो न कर्तव्यः । 'कुत इमाः प्रजा' इति प्रश्नवाक्यगतप्रजाशब्दस्य चेतनविशिष्टचेतनपरतया तद्घटकचतुर्मुखादि चेतनाचेतनरूपसर्ववस्तुपरतायाः प्रक्रमेऽवगमात् । मार्गमध्ये चन्द्रादित्यप्रातिथ्य नवमदशमवाक्याभ्या-

विश्वरूपं हरिणं जातवेदसं परायणं ज्योतिरेकं तपन्तम् ।
सहस्ररश्मिः शतधा वर्तमानः प्राणः प्रजानामुदयत्येष सूर्यः ॥८॥

विश्वरूपं हरिणं जातवेदसं परायणं ज्योतिरेकं तपन्तम् । सहस्ररश्मिः शतधा वर्तमानः प्राणः प्रजानामुदयत्येष सूर्यः । **विश्वरूपं** सर्वशरीरम् । जातानि वेदांसि यस्मात् स **जातवेदाः**, "प्रज्ञा च तस्मात् प्रसृता पुराणी" इति सर्वज्ञानोत्पादकम् । **परायणं** परं (परम)प्राप्यम् **ज्योतिः** सर्वप्रकाशकदीप्तिमन्तम् । **एकम्**-अद्वितीयम् । **तपन्तम्** जाठराग्न्यादिरूपेण तपन्तम् ॥ "संतापयति स्वं देहमापादतलमस्तकम्", "अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः । प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम्" इति श्रुतिस्मृतिभ्याम् । **हरिणं** हरिमित्यर्थः । हरिशब्दस्य नान्तत्वं छान्दसम् । **वर्तमानः** अनुवर्तमानः । तद्विधेयतया तच्छरीरभूत इति यावत् । **सहस्ररश्मिः** नानाविधविषयविषयकज्ञानवान् । **प्रजानां** स्थावरजङ्गमात्मकानां प्राणानां **प्राणः** धारकः **सूर्यः** सूर्यवत्प्रकाशकः । **एषः** जीवः **शतधा** देवमनुष्यादिनानाविधदेहात्माभिमानशालितया **उदयति**-सुषुप्तिस्थाना दुदयते, सर्गकाले उदयत इति वाऽर्थः ॥ ८ ॥

मेव सेत्स्यतीति किमादौ तदुक्त्येति चिमृश्य आदित्यशब्दस्य अदितिदेवतामर्यादयैव योगव्युत्पत्त्या भोक्तृपरत्वमुपवर्ण्य प्रसिद्धचन्द्रादित्यप्रस्तावः इह नाऽऽदृत । एवञ्च चन्द्रमश्शब्दोऽपि 'चदि आह्लादने' इत्येव भोग्यपरो ग्राह्य ॥] सर्वव्याख्यानाधिकरणश्रुतप्रकाशिकायां अप्यत्रैव तात्पर्यमिति भावः ।

संवत्सरो वै प्रजापतिः । तस्यायने दक्षिणं चोत्तरं च । तत् ये ह वै तदिष्टापूर्ते कृतमित्युपासते, ते चान्द्रमसमेव लोकमभिजयन्ते ; त एव पुनरावर्तन्ते । तस्मादेते ऋषयः प्रजाकामा दक्षिणं प्रतिपद्यन्ते । एष ह वै रयिर्यः पितृयाणः ॥ ९ ॥

एवं सूक्ष्मप्रकृतिजीवशरीरकस्य प्रजापतेः रयिप्राणशब्दितप्रकृतिपुरुषरूपभोग्यभोक्त्रात्मना विभागमुपवर्ण्य तस्यैव परमात्मनः [अखण्डकालरूपेण स्थितस्य] खण्डकालरूपेण विभागं प्रदर्शयिष्यन् चित्तावतरणाय वा उपासनार्थं वा संवत्सराख्यप्रजापतेर्दक्षिणोत्तरायणात्मकं रयिप्राणरूपं विभागम्, तथा मासाख्यप्रजापतेः रयिप्राणशब्दितं कृष्णशुक्लपक्षात्मकं विभागम्, अहोरात्रात्मककालरूपप्रजापतेः रयिप्राणात्मकं रात्र्यहरात्मकं विभागम्, तत्प्रसङ्गेन रयिशब्दार्थदक्षिणायनकृष्णपक्षरात्र्यपेक्षया प्राणशब्दार्थभूतोत्तरायणशुक्लपक्षदिवसानामुत्कर्षं च वक्तुमारभते—**संवत्सरो वै प्रजापतिस्तस्यायने दक्षिणं चोत्तरं च ।** तस्य संवत्सराख्यकालरूपस्य प्रजापतेर्दक्षिणोत्तरशब्दिते अयने सूर्यगत्याधारभूते द्वे रूपे स्तः । **तद्ये ह वै तदिष्टापूर्ते कृतमित्युपासते, ते चान्द्रमसमेव लोकमभिजयन्ते त (न्तेऽत) एव पुनरावर्तन्ते ॥** ह वा इति प्रसिद्धौ ; स्मरणे वा । अयमर्थः—तत्—तत्र ये पुरुषाः इष्टापूर्ते दत्तमिति तत् कर्मोपासत इत्यर्थः । 'य इमे ग्रामे इष्टापूर्ते दत्तमित्युपासते' इति श्रुत्यन्तरैकार्थ्यात् कृतशब्दो दत्तपरः । इष्टम् यागादि श्रौतम् । पूर्तं=खातादि । इतिशब्दः प्रकारवचनः । यागदानवापीकूपादिकं कर्म येऽनुतिष्ठन्ति, ते चन्द्रमस्संबन्धिनं लोकमभिजयन्ते

अथोत्तरेण, तपसा ब्रह्मचर्येण श्रद्धया विद्ययाऽऽत्मानमन्विष्य, आदित्यमभिजयन्ते । एतद्वै प्राणानामायतनम् एतदमृतमभयम्

अभिजयन्ति, प्राप्नुवन्ति । त एव पुनरावर्तन्ते । न त्वात्मोपासका उत्तरमार्गेण गता इत्यर्थः ॥ **तस्मादेते ऋषयः प्रजाकामा दक्षिणं प्रतिपद्यन्ते । एष ह वै रयिर्यः पितृयाणः ॥** तस्माद्धेतो एते कर्मठा प्रजास्वर्गादिलक्षणक्षुद्रफलकामा ऋषयः क्षुद्रफलद्रष्टारः दक्षिणं पन्थानं पितृयाणशब्दितं प्रतिपद्यन्ते । एष एव पितृयाणः **रयिः** अन्नप्रधानो वैषयिकभोगात्मक इति यावत् । यद्यपि, 'धूमो रात्रिस्तथा कृष्ण' इत्यादिप्रमाणप्रतिपन्नः पुराणेषु दक्षिणमार्गनिर्दिष्टो धूमादिचन्द्रान्तः पितृयाणोऽ[प्य]न्यः । संवत्सरावयवभूतषण्मासात्मदक्षिणायननिर्दिष्टोऽप्यन्यः । तथाऽपि दक्षिणायनशब्देन द्वयोरपि व्यवह्रियमाणत्वात् कालमार्गयोरेकीकृत्य व्यवहार उपपद्यत इति द्रष्टव्यम् ॥ ९

अथोत्तरेण तपसा ब्रह्मचर्येण श्रद्धया विद्ययाऽऽत्मानमन्विष्याऽऽदित्यमभिजयन्ते । अथशब्दो वाक्यान्तरोपक्रमे । ये तावत् "किं प्रजया करिष्याम" इति विरक्ता ऋषयः कायक्लेशादिलक्षणेन तपसा, स्त्रीसङ्गराहित्यलक्षणेन ब्रह्मचर्येण, आस्तिक्यबुद्धिलक्षणया श्रद्धया प्रत्यगात्मविद्यया परमात्मानमुपास्य अर्चिरादिना **उत्तरेणा**यनेन, "आदित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स

१० एष निरोध इत्यस्य 'एतद्वै खलु लोकद्वारं विदुषां प्रपदनं निरोधोऽविदुषाम्' (छा ८ ६ ५) इत्येतदनुसारेणाऽऽदित्यपरत्वसंभवेऽपि, एतद्वै प्राणानामायतनमित्यादेरादित्यापेक्षया पर-

एतत् परायणम् , एतस्मान्न पुनरावर्तन्त इत्येष निरोध ॥
तदेष श्लोक ॥ १० ॥—

एनान् ब्रह्म गमयति" इत्युक्तप्रकारेण ब्रह्मप्राप्तिद्वारभूतमादित्यमभिजयन्ते–प्राप्नुवन्तीत्यर्थ । अनन्यगतया निर्दिष्टमात्मान स्तुवन् तेषामपुनरावृत्तिं दर्शयति—**एतद्वै प्राणानामायतनमेतदमृतमभयमेतत् परायणमेतस्मान्न पुनरावर्तन्त इत्येष निरोधः** । आयतनशब्दापेक्षयैवदिति नपुसकलिङ्गनिर्देश । **प्राणाना** प्राणभृताम् **आयतनम्** आधारभूतम्, "तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्रा प्रज्ञामात्रास्वर्पिता प्रज्ञामात्रा प्राणेऽर्पिता" इति परमात्मन सकलचेतनाधारत्वोक्ते । एतत् **परायण** परम (पर) प्राप्यमित्यर्थ । **एतस्मान्न पुनरावर्तन्ते** । उपासका इति शेष । उत्तरेण मार्गेण गता, 'मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते" इत्युक्तरीत्या परमात्मान प्राप्य न निवर्तन्ते इत्यर्थ । **एष निरोधः** । एष प्रजाकामो वै प्रजापतिरिति प्राक्प्रजापतिशब्दनिर्दिष्ट परमात्मा स्व भासस्य पुनरावृत्तिनिरोधकारी । अतस्त परमात्मान प्रजापतिशब्दित प्राप्तस्य तदुपासकस्यापुनरावृत्तिरुपपद्यत इति भाव । अत्र, एष इत्येतच्छब्देन प्रजापतिपरामर्शात् आत्मानमन्विष्यत्यात्मशब्दोऽपि प्रजापतिपर एव । अत एवैतत् सर्वमभिप्रेत्य सर्व व्याख्यानाधिकरणे (१ ४ ८) व्यासार्यै, "तपसा ब्रह्मचर्येण श्रद्धया विद्ययाऽऽत्मानमन्विष्याऽऽदित्यमभिजयन्ते—

मात्मपरत्वेऽधिकस्वारस्यात् पुनरावृत्त्युपस्थापकसत्त्वाच्चैव पुनरावृत्तिनिरोधकारी परमात्मेति व्याख्यातम् ।

**पञ्चपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्धे पुरीषिणम्।
अथेमे अन्य उपरे विचक्षणं सप्तचक्रे षडर आहुरर्पितम् इति॥११॥**

एतस्मात् न पुनरावर्तन्ते" इत्यर्चिरादिगत्या अपुनरावृत्तिप्रतिपादनात्, 'प्रजाकामो ह वै प्रजापतिः' इति प्रजापतिशब्दनिर्दिष्टं परं ब्रह्मेति प्रतिपादितमिति द्रष्टव्यम् । [ततश्च प्रजापतिमुपासीनस्यार्चिरादिगत्यप्रतिपादनात् कथं प्रजापतेः ब्रह्मत्वमिति शङ्का पराकृता]

तदेष श्लोकः। तत् तस्मिन् संवत्सरात्मनि प्रजापतौ वक्ष्यमाणः श्लोक इत्यर्थः ॥ १० ॥ **पञ्चपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्धे पुरीषिणम्** ॥ वत्सरसंवत्सरपरिवत्सरेदावत्सरानुवत्सररूपाः पञ्च पादा यस्य स पञ्चपादः ; अथवा हेमन्तशिशिरयोरेकीकरणात् षडृतवः पञ्चैव सपद्यन्ते । ते पादा यस्य स पञ्चपाद , तम् । **पितरं** सर्वस्य जनकम् । **द्वादशाकृतिं** द्वादशमासाकृतिम् । **दिवः** स्वर्गात् **परे** परस्मिन् अर्धे स्थाने । **पुरीषिणम्** । पुरीषशब्देन स्वर्णभूमिसंनिहितं

---

११. प्राकृतस्यैव कालकाल्यत्वमिति दर्शयितुमयं श्लोक उपात्तः । वत्सरादिभेदेन अब्दपाञ्चविध्यं विष्णुपुराणे वर्णितम् । पुरीषपदस्य गोळकावरणार्थकत्वं कुत्रापि न दृश्यते । शब्दोऽयमुदकनामत्वेन निरुक्ते पठितः । शाङ्करेऽपि पुरीषिणमुदकवन्तमिति भाषितम् । तत्र 'आदित्याज्जायते वृष्टिः' इति वृष्ट्युदकस्यान्तरिक्षगतस्य आनन्दगिरीयोक्तरीत्या ग्रहणे, दिवः परेऽर्धे इत्येतस्यासामञ्जस्यमाकलय्य संपूर्णब्रह्माण्डस्य संवत्सरवश्यत्वप्रतिपादनाय ब्रह्माण्डावरणोदकग्रहणमत्र विवक्षित्वा भाष्यमिदं प्रवृत्तं

ब्रह्माण्डगोलकावरणमुच्यते । तदस्य स्थानत्वेनास्तीति पुरीषिणमाहुरित्यन्वयः । अथेमे अन्य उ परे विचक्षणं सप्तचक्रे षडर आहुरर्पितम् । अथशब्दः पक्षान्तरपरिग्रहे । उशब्दोऽवधारणे । परशब्दः उत्कृष्टवचनः । पूर्वोक्तेभ्योऽन्ये उत्कृष्टाः इमे कालतत्त्वविदः आदित्यादिग्रहसप्तकलक्षणचक्रयुक्ते ऋतुलक्षणारषट्कयुक्ते संवत्सराख्ये रथे जगत् सर्वं विचक्षणं कुशलं निश्चलं यथा भवति तथा अर्पितमित्याहुः ॥ ११ ॥

स्याच्चेत्, गोळकावरणमुदकमुच्यत इति पाठः स्यात् । पुरीषशब्दः (सूर्य) मण्डलेपि प्रयुज्यते । पुरीषी इत्यस्य प्राप्तस्थान इति स्थिरवासी इत्यप्यर्थोऽस्ति । एवञ्च विना क्लेशम्, दिवः परेऽर्धे अवस्थितमित्यप्यर्थः स्यात् । अयं मन्त्रः ऋग्वेदे (मं. २-२२-१६४-१२)पठितः । तत्र सायणभाष्ये, निरुक्तभाष्ये च अर्पितमिति पदं पूर्वार्धेऽप्याकृष्य पुरीषिणं वृष्ट्युदकवन्तं संवत्सरं दिवःपरेऽर्धे—परस्थानगतादित्येऽर्पितमाहुरित्यर्थ उक्तः । शाङ्करेऽपि उ इति पृथक्पदम् । एकपदं कृत्वा तु उपरे उपरतिकारिणि संवत्सरे इति सायणः । निरुक्तभाष्ये तु सप्तेति पृथक्पदं कृत्वा उपरे=उपरिस्थानस्थितास्सप्तर्षय इत्युक्तम् । आदित्येऽर्पितस्संवत्सरः, संवत्सरेऽर्पित आदित्य इति पक्षद्वयभेदस्तत्र ऋगर्थत्वेन दर्शितः । विचक्षणं-विविधद्रष्टारमादित्यमित्यर्थ इति । शाङ्करेऽपि जगत्सर्वमर्पितमाहुरित्येव भाषितम् । ऋग्वेदे एतदुत्तरमन्त्रेपि सर्वजगद्ग्रहणमस्ति, 'पञ्चारे चक्रे परिवर्तमाने तस्मिन्नातस्थुर्भुवनानि विश्वा' इति । एवञ्च शाङ्करादिरीत्या पञ्चपादत्वषडरत्वादिकृतः पूर्वोत्तरार्धयोः पक्षभेद इति वक्तव्यम् । उपर इत्यस्यैकपदेऽप्युत्कृष्ट इत्यर्थो घटते इत्यलम् ।

मासो वै प्रजापतिः । तस्य कृष्णपक्ष एव रयिः शुक्लः प्राणः । तस्मादेत ऋषयश्शुक्ल इष्टिं कुर्वन्ति ; इतर इतरस्मिन् ॥ १२ ॥

अहोरात्रो वै प्रजापतिस्तस्याहरेव प्राणो रात्रिरेव रयिः । प्राणं वा एते प्रस्कन्दन्ति, ये दिवा रत्या संयुज्यन्ते । ब्रह्मचर्यमेव तत्, यत् रात्रौ रत्या संयुज्यन्ते ॥ १३ ॥

यथा संवत्सरो रयिप्राणात्मना विभक्तः, एवं मासोऽपि विभक्त इत्युपासनार्थं प्रदर्शयति— **मासो वै प्रजापतिस्तस्य कृष्णपक्ष एव रयिः शुक्लः प्राणः** । स्पष्टोऽर्थः । **तस्मादेते ऋषयः शुक्ल इष्टं कुर्वन्ति ; इतर इतरस्मिन्** ॥ यस्माच्छुक्लः पक्षः प्राणतयोत्कृष्टः, तस्मात् ऋषयः अतीन्द्रियार्थद्रष्टारः सर्वेऽपि शुक्लपक्ष एव शोभनानि कर्माणि कुर्वन्ति । **इतरे** अनृषयोऽज्ञाः पुनः अप्राणतया असारभूते कृष्णपक्षे कुर्वन्तीत्यर्थः ॥ १२ ॥

अमुमेव विभागमहोरात्रेऽप्युपासनाय प्रदर्शयति **अहोरात्रो वै प्रजापतिस्तस्याहरेव प्राणो रात्रिरेव रयिः** । स्पष्टोऽर्थः । **प्राणं वा एते प्रस्कन्दन्ति ये दिवा रत्या संयुज्यन्ते** । यस्माद्धेतोरहः प्राणरूपत्वम्, अत एव **रत्या** रत्यर्थम् । प्रयोजनस्य हेतुत्वविवक्षया तृतीया । प्राणभूतेऽह्नि स्त्रीभिर्ये संयुज्यन्ते, त एते प्राणमेव **प्रस्कन्दन्ति** प्रकर्षेण शोषयन्ति । प्राणापचारात् प्राणमेव निघ्नन्तीत्यर्थः। ननु तर्हि स्वयोषिद्गमनं गृहस्थैनं कार्यमित्याशङ्क्य रात्रौ कार्यमित्याह — **ब्रह्मचर्यमेव तत्, यत् रात्रौ रत्या संयुज्यन्ते** । रत्यर्थं रात्रौ स्त्रीसंयोगो ब्रह्मचर्यमेव । मैथुनमेव न भवतीत्यर्थः । तत्र दोषाभावेति यावत् ॥ १३ ॥

अन्नं वै प्रजापतिः । ततो ह वै तद्रेतः । तस्मादिमाः प्रजाः प्रजायन्त इति ॥ १४ ॥ तद्ये ह तत् (?) प्रजापतिव्रतं चरन्ति, ते मिथुनमुत्पादयन्ते । तेषामेवैष ब्रह्मलोकः ।

येषां तपो ब्रह्मचर्यम्, येषु सत्यं प्रतिष्ठितम् ॥ १५ ॥ तेषामसौ विरजो ब्रह्मलोकः, न येषु जिह्ममनृतं न माया चेति ॥ १६ ॥

इति प्रथमः प्रश्नः ॥

ननु प्रकृतिपुरुषकालात्मकं ब्रह्म कथं प्रजानामुपादानमित्युच्यते ; अन्नपरिणामभूतस्य रेतस एव प्रजोपादानत्वदर्शनादित्याशङ्क्याऽऽह—**अन्नं वै प्रजापतिस्ततो ह वै तद्रेतः तस्मादिमाः प्रजाः प्रजायन्त इति ॥** अन्नावस्थं तदुत्पन्नरेतोवस्थं च यत्. प्रजापतिशब्दितं ब्रह्मैव, अतः प्रकृतिपुरुषसंवत्सरमासादिकालान्तरेतोवस्था-(रूपा)द्ब्रह्मण. सर्वाः प्रजाः प्रजायन्त इति प्रजापतिशब्दितस्य ब्रह्मणः उपादानत्वमुपपद्यत इति भावः ॥ १४ ॥

[1]प्रसङ्गादमुमुक्षुनिन्दापूर्वकं मुमुक्षून् स्तौति— **तद्ये ह वै (?) प्रजापतिव्रतं चरन्ति ते मिथुनमुत्पादयन्ते । तेषामेवैष ब्रह्मलोकः (वैष लोकः)** । तस्मात् ये, अन्नं वै प्रजापतिरिति प्रजापतिशब्दितस्यान्नस्य अन्नं भक्षणं व्रतत्वेनानुतिष्ठन्ति, येऽन्नभक्षणशीला ब्रह्मचर्यरहिता, त एव प्रजा उत्पादयन्ते । एष ब्रह्म लोका पुत्रपश्वादि लक्षण कार्यभूतब्रह्मरूपो लोक (एष लोकः पुत्रपश्वादिलक्षणो लोकः)

येषां तपो ब्रह्मचर्यं येषु सत्यं प्रतिष्ठितम्, तेषामसौ विरजो

---

1 प्रसंगादिति। उपस्थितस्योपेक्षानर्हत्वं प्रसङ्गः। मन्दुर्ब्रह्मान्वेषकत्वपा मुमुक्षापूर्वकमेव प्रश्नकरणात् उत्तरं मोक्षे पर्यवसायपतीति भावः।

ब्रह्मलोको न येषु जिह्ममनृतं न माया चेति ॥ येषां कायशोषणाख्यं तप, न भक्षणशीलता, मैथुनवर्जनम् ;-येषु च सत्यवचनं प्रतिष्ठितम्—येषु च 'मनस्यन्यद्वचस्यन्यत् कर्मण्यन्यद्दुरात्मनाम्' इत्युक्तकौटिल्यलक्षणजिह्मत्वं नास्ति ; भूताहितवचनलक्षणमसत्यवचनं नास्ति—तेषामसौ विरजो निर्दोषः ब्रह्मैव लोको ब्रह्मलोकः परब्रह्मरूपं फलमित्यर्थः । तथैव व्यासार्यैः सर्वव्याख्यानाधिकरणे विवृतत्वादिति द्रष्टव्यम् । इतिशब्दः प्रतिवचनसमाप्तौ ॥ १५-१६ ॥

इति प्रश्नोपनिषत्प्रकाशिकायां प्रथमः प्रश्नः ॥ १ ॥

१५-१६. शाङ्करे मायाजिह्मानृतानि त्रीणि पृथक्पृथङ्निषिद्धानि । तदा यथा तपस्सत्यब्रह्मचर्याणि त्रीणि परिग्राह्याण्युक्तानि, तथा परिहर्तव्यान्यपि त्रीणीमान्युच्यन्त इत्यौचित्यम् । एवंसति अत्र भाष्ये मायाशब्दव्याख्यानं भ्रष्टं स्यात् । 'अन्यथा आत्मानं प्रकाश्यान्यथैव कार्यं करोति, सा माया मिथ्याचाररूपा' इति शाङ्करम् । यदि तु नञ्द्वयस्यैव श्रवणात् द्वयमेव निषेध्यमभिमतम्, तदा—'मनस्यन्यत्' इत्यादिः 'न माया' इत्यस्य व्याख्या । जिह्ममनृतमिति विशेष्यविशेषणभावापन्नम् । जिह्मपदं भूताहितवचनपरम् । तथा च जिह्मभूतासत्यमात्रनिषेध इति नेतव्यम् । नन्वत्रविप्रकृष्टवाचिनः असावितिपदस्य श्रवणादर्चिरादिप्रस्तावाच्च ब्रह्मलोकपदमप्राकृतलोकपरमस्तु, तत्राह—तथैवेति कार्यलोकेऽपि ब्रह्मलोकपदं पूर्ववाक्ये प्रयुक्तम् । तत्रापि ब्रह्मशब्दस्य परब्रह्मपरत्वेन वा चतुर्मुखपरत्वेन वा षष्ठीतत्पुरुषसंभवेऽपि संभवतस्सामानाधिकरण्यस्य त्यागायोगात् ब्रह्मरूपत्वं लोकस्य विवक्ष्यते । असाविति विप्रकृष्टलोकवाचितया विप्रकर्षविवक्षणात् तस्य लोकस्याप्युक्तत्वं सिध्यतीत्याशयः ॥ अत्र प्रथमप्रश्ने 'प्रजाकामो ह वै'

हरिः ओम् । अथ हैनं भार्गवो वैदर्भिः पप्रच्छ, 'भगवन् कत्येव देवाः [1]प्रजां विधारयन्ते ; कतर एतत् प्रकाशयन्ते ; कः पुनरेषां वरिष्ठः इति ॥ १ ॥

तस्मै स होवाच आकाशो ह वा एष देवो वायुरग्निरापः

देहेन्द्रियमनःप्राणादिविलक्षणप्रत्यगात्मशोधनाय प्रश्नान् अवतारयति । उक्तं च व्यासार्यैः, "उत्तरेषु खण्डेषु प्रत्यगात्मा विशोध्यते" इति । अथ हैनं भार्गवो वैदर्भिः पप्रच्छ । कबन्धिप्रश्नानन्तरं पिप्पलादं भार्गवो वैदर्भिः पृष्टवान् । किमिति— **भगवन् कत्येव देवाः प्रजां विधारयन्ते कतर एतत् प्रकाशयन्ते कः पुनरेषां वरिष्ठ इति ॥** हे भगवन् ! किंसंख्याका देवाः स्थावरजङ्गमात्मिकां प्रजां बिभ्रति । ए[ते]ष्वेव देवेषु कतरे देवा एतच्छरीरं तत्कार्यं (तद्वार्यैः) प्रकाशयन्ते । कः पुनरेतेषां श्रेष्ठ इति ॥ १

तस्मै स होवाच । स्पष्टोऽर्थः । मुख्यप्राणस्यैव धारकत्व-प्रकाशकत्वश्रेष्ठत्वानि वक्तुमाख्यायिकामाह— **आकाशो ह वा एष देवो वायुरग्निरापः पृथिवी वाङ्मनश्चक्षुःश्रोत्रं च ।** ह वा इति

इत्यादिना प्रजापतेः प्रकृतिपुरुषद्वारा प्रजास्रष्टृत्वमुक्तम् । एवं निमित्त-कारणभूतस्य प्रजापतेरुपादानत्वस्यापि सिद्धये 'स एष वैश्वानर' इत्यादिना जीवस्य तदात्मकत्वमुक्तम् । अथ पुनरावृत्त्यपुनरावृत्ति-विवेचनमारभ्य कालस्यापि परमात्मात्मकत्वमुक्त्वा, ततः पुनरावृत्तौ व्रीहियवादिभावेन स्थित्वा जायमानानां प्रजानामुपादानभूताचेतनां-शस्यापि परमात्मकत्ववर्णनेन परमात्मन उपादानत्वं दर्शितम् । एवमत्र पुरुषगतेष्टापूर्तादिकर्मकर्तृत्वबुभुक्षुत्वादिसहकारेण पर-मात्मनस्त्रिविधकारणत्वमिह स्थापितमिति ॥ [1]प्रजाः इति माध्वे ।

पृथिवी वाङ्मनश्चक्षुः श्रोत्रञ्च । ते प्रकाश्याभिवदन्ति, वयमेतद्[1]-बाणमवष्टभ्य विधारयाम इति ॥ २ ॥

प्रसिद्ध्यतिशये । एषः प्रसिद्ध आकाशः । दीव्यति[2] गच्छतीति देवो गमनशीलः । तादृशो वायुश्च । अग्निरापः पृथिवी । स्पष्टोऽर्थः । वाक्शब्देन कर्मेन्द्रियाणि सर्वाण्युपलक्ष्यन्ते, चक्षुःश्रोत्रशब्देन ज्ञानेन्द्रियाणि। ते प्रकाश्याभिवदन्ति वयमेतद्बाणमवष्टभ्य विधारयाम इति ॥ आकाशादयः सर्वे मिलित्वा(ता) पुरोवर्तिशरीरं प्रदर्श्य अभितः स्थित्वा वदन्ति स्म । किमिति— वयं [1]बाणवत्सचारशीलमेतत् पुरोवर्ति शरीरमवलम्ब्य विधारयामः । अवकाशादिविविधकार्यक्षमतया धारयाम इत्यर्थः ॥ २ ॥

---

1 'कायो बाण शरीरञ्च इत्यभिधानात् बाण शरीरम् इति माध्व गीताभाष्ये (२-७-२)। 2 दीव्यति गच्छतीति । ननु वक्ष्यमाणाभिवदनादिकर्तृत्वस्याचेतनेष्वसम्भवादाकाशादिपदं तत्तदधिष्ठातृदेवतापरमिति ज्ञापनाय मूले देवपदं प्रतिव्यक्त्यन्वयाभिप्रायेण प्रयुक्तमिति सुवचम् । वायोर्गन्तृत्वरूपार्थस्तु वायुपदेनैव लभ्यत इति चेन्न—पूर्वं कत्येव देवा इत्युपक्रमादेव देवतापर्यन्तविवक्षा सर्वत्र स्पष्टेति नात्र तत् वक्तव्यम् । अतो वरिष्ठस्य प्राणस्य 'पिता त्वं मातरिश्वनः' इति वक्ष्यमाणरीत्या वायुविकारतया वायौ विशेषगौरवं प्रदर्शयितुं देव इत्युक्तम् । विशेषगौरवं च मातरिश्वपदवाच्यगमनशीलत्वप्रयुक्तमित्यालोच्यैव व्याख्यानात् । ननु 'वाङ्मनश्चक्षुः श्रोत्रं च । ते प्रीताः प्राणं स्तुन्वन्ति इति चतुर्णां स्तोतृतयोपादानात् 'या ते तनूर्वाचि (१२)' इत्यादिमन्त्रानुरोधाच्च इन्द्रियान्तराणामाकाशादीनां चाभिवदनकर्तृत्वाभावप्रतीतेः कथमाकाशादयस्सर्वे इतीति चेन्न, केनोपनि-

तान् वरिष्ठः प्राण उवाच, 'मा मोहमापद्यथ(थाः) । अहमेवैतत् पञ्चधाऽऽत्मानं प्रविभज्यैतद्बाणमवष्टभ्य विधारयामि' इति ॥
तेऽश्रद्दधाना बभूवुः । सोऽभिमानादूर्ध्वमुत्क(त्क्रा)मत इव ।
तस्मिन्नुत्क्रामत्यथेतरे सर्व एवोत्क्रामन्ते । तस्मिश्च (सिंस्तु)

तान् वरिष्ठः प्राण उवाच । मुख्यः प्राण उवाचेत्यर्थः । किमिति—'**मा मोहमापद्यथा: । अहमेवैतत् पञ्चधाऽऽत्मानं विभज्यैतद्बाणमवष्टभ्य विधारयामि' इति** । 'हे आकाशादयः ईदृशीं विपरीतबुद्धिं मा गच्छत । अहमेव स्वात्मानं प्राणापानव्यानसमानोदानरूपेण पञ्चधा विभज्य धारयामि' इति । एवं वदतो मुख्यप्राणस्यायं भावः —हे आकाशादयः ! भवन्तः अवकाशादिप्रातिस्विककार्यक्षमाः, न तु सर्वकार्यक्षमाः । अहं तु भवतामपि कार्यनिमित्तत्वात् भवत्कार्यक्षमः । मया क्रि(मयाऽक्रि)यमाणे जीवने तु भवत्सु न कोऽपि समर्थः (क्षमः) इति । **तेऽश्रद्दधाना बभूवुः** । ते तद्वाक्ये विश्वासं न कृतवन्तः ॥ ३ ॥ **सोऽभिमानादूर्ध्वमुत्क्रमत इव** । ततः स प्राण एषां गर्वमवलोक्य अहंकारावेशादष्टोत्तरशतमर्मस्थानानामुपरि स्वसामर्थ्यं प्रकटयितुं स्वस्थानात् किंचिदुदचलत् । इवशब्दोऽल्पार्थे । साक्षादुत्क्रमणे अप्रति-

---

पदादिदृष्टरीत्या प्राधान्यात् प्रायो वागादिमात्रनिर्देशेऽपीन्द्रियान्तरस्पर्धाया अपि बृहदारण्यका(३-५-२१)दिसिद्धत्वात् । आकाशादीनां शरीराकारपरिणामांशेन प्राणमवष्टभ्य विधार्यमाणतयोपयोगेऽपि तत्तदधिष्ठातृदेवतानामपीन्द्रियाद्यधिष्ठातृदेवतावत् कलहप्रवृत्त्यस्य संभवेन तस्यात्र विस्पष्टमवगमेन च तत्त्यागायोगाच्च । स्वातन्त्र्यरूपप्रकाशकत्वं पुनः प्राधान्याद्वागादिमात्रेऽस्तु; 'कतरे' इत्युक्तेः ।

प्रतिष्ठमाने सर्व एव प्रतिष्ठन्ते । तद्यथा मक्षिका मधुकरराजा-
नमुत्क्रामन्तं सर्वा एवोत्क्रामन्ते । तस्मिंश्च प्रतिष्ठमाने सर्वा एव
प्रतिष्ठन्त एवं वाङ्मनश्चक्षुः श्रोत्रं च ॥ ते प्रीताः प्राणं स्तुन्वन्ति ॥ ५
एषोऽग्निस्तपत्येष सूर्य एष पर्जन्यो मघवानेष वायुः ।

समाधेः शरीरविनाशः स्यादिति मत्वोत्क्रमणमिव कृतवानिति भावः । तस्मिन्नुत्क्रामत्यथेतरे सर्व एवोत्क्रामन्ते । तस्मिन् मुख्यप्राणे उत्क्रामति इतरे सर्वे प्राणा उदक्रामन्-तस्मिंस्तु प्रतिष्ठमाने सर्व एव प्रतिष्ठन्ते । शरीरपातभीत्या पुनः प्रतिष्ठां प्राप्नुवति सतीतरेऽपि प्रतिष्ठिता इत्यर्थः । तत्र दृष्टान्तमाह—तद्यथा मक्षिका मधुकरराजानमुत्क्रामन्तं सर्वा एवोत्क्रामन्ते तस्मिंस्तु प्रतिष्ठमाने सर्वा एव प्रतिष्ठन्त एवं वाङ्मनश्चक्षुः श्रोत्रं च । यथा मधुकरमक्षिकास्तत्र श्रेष्ठां मक्षिकामुत्क्रामन्तीमनूत्क्रामन्ति, प्रतिष्ठितायां तस्यां स्वयं प्रतिष्ठिता भवन्ति—एवं वागाद्याः प्राणाः मुख्यप्राणानुविधायिनोऽभवन्नित्यर्थः । ते प्रीताः प्राणं स्तुन्वन्ति । मुख्यप्राणमाहात्म्यदर्शनप्रीता वागाद्याः प्राणाः मुख्यप्राणं तुष्टुवुरित्यर्थः । स्तौतेर्व्यत्ययात् श्नुः ॥ ५ ॥

स्तुतिमेवाऽऽह— एषोऽग्निस्तपत्येष सूर्य एष पर्जन्यो

४ प्रतिष्ठिता इति । ननु प्रतिष्ठमान इति श्रौतपदस्य प्रोपसृष्टतया प्रस्थानमेवार्थस्स्यात्, न तु प्रत्युपसृष्टपदबोध्या प्रतिष्ठेति चेन्न-उत्क्रमणप्रतिकोटित्वेनाभिधातव्यतया प्रोपसृष्टोऽप्ययं धातुः प्रकृते प्रकर्षेण स्थितिरूपां प्रतिष्ठां वदतीति स्वीकार्यत्वात् । यद्वोपरि भूरिप्रयोगानुसारेण प्रातिष्ठमान इति आङुपसर्गेणापि घटितः पाठः स्यात्॥ उत्क्रामते प्रतिष्ठन्ते इति दीर्घरहित एव सर्वत्र माध्वपाठः । मधुमक्षिका इति च ।

एष पृथिवी रयिर्देवः सदसच्चामृतं च यत् ॥ ५ ॥
अरा इव रथनाभौ प्राणे सर्वं प्रतिष्ठितम् ।
ऋचो यजूंषि सामानि यज्ञः क्षत्रं [च] ब्रह्म च ॥ ६ ॥
प्रजापतिश्चरसि गर्भे त्वमेव प्रतिजायसे ।

मघवानेष वायुः एष पृथिवी रयिर्देवः सदसच्चामृत च यत् ॥ एष मुख्यप्राणोऽग्निरूपेण तपति । एष प्राण एव सूर्यः । सर्वेषां प्राणायत्तस्थितिकत्वात्, 'यदधीना यस्य सत्ता तत्तदित्येव भ(ग)ण्यते' इति रीतिमनुसृत्य सामानाधिकरण्येन व्यपदेशो द्रष्टव्यः । रयिर्देवः अन्नभूतो देवः । चन्द्रमा इति यावत् । सदसच्छब्दौ वर्तमाना वर्तमानपरौ वा प्रत्यक्षाप्रत्यक्षपरौ वा स्थूलसूक्ष्मपरौ वा चेतनाचेतनपरौ वा । अमृतशब्दो मोक्षपरः ; तस्यापि तदधीनत्वादिति भावः ॥ ५ ॥

अरा इव [1]रथनाभौ प्राणे सर्वं प्रतिष्ठितम् । चक्रस्य नाभिनेम्योरन्तरालवर्तीनि काष्ठानि अरशब्देनोच्यन्ते चक्रस्य मध्यप्रदेशो नाभिशब्देनोच्यते । यथा अरा नाभावर्पिताः, एवमस्मिन् प्राणे सर्वं प्रतिष्ठितमित्यर्थः । सर्वशब्दार्थं स्पष्टयति—ऋचो यजूंषि सामानि यज्ञः क्षत्रं ब्रह्म च ॥ अत्र ब्रह्मक्षत्रशब्दौ स्थावरजङ्गमात्मकप्राणिमात्रोपलक्षकौ ॥ ६ ॥

एवम् एष इत्यङ्गुल्या निर्दिश्य परम्परं दर्शयित्वा तद्गुणान् संकीर्त्य पश्चात् तमेव मुख्यप्राणमभिमुखीकृत्य स्तुवन्ति—प्रजापतिश्चरसि गर्भे त्वमेव प्रतिजायसे । त्वं प्रजाना रक्षकः सन् प्राणादिवायु-

---

1 भूमविद्यायामेतत्समानाकारके वाक्ये तु प्राणशब्दः प्राणसहचारिजीवपरः ।

तुभ्य प्राण! प्रजास्त्विमा [बलिं हरन्ति] य प्राणै प्रतितिष्ठसि ॥
देवानामसि वह्नितम पितॄणा प्रथमा स्वधा ।
ऋषीणा चरित सत्यमथर्वाङ्गिरसामसि ॥ ८ ॥
इन्द्रस्त्व प्राण! तेजसा रुद्रोऽसि परिरक्षिता ।

रूपेण गर्भे सचरसि । तथा गर्भोत्पादकतया तत्पापकतया च पितृरूप एव वर्तमान एव त्वमुत्पादकत्वप्रातिलोम्येन पुत्रादिरूपेण जायसे । **तुभ्य प्राण प्रजास्त्विमाः [बलिं हरन्ति] य प्राणैः प्रतितिष्ठसि ॥** हे प्राण! स्थावरजङ्गमात्मिका **इमाः प्रजाः तुभ्य** त्वदर्थाः त्वच्छेष भूता । [यतो बलिमन्नादिक ते उपहरन्ति ।] यस्त्व प्राणनादिव्यापारै सर्वत्र प्राणिषु प्रतिष्ठितोऽसीत्यर्थ ॥ ७ ॥

देवानामसि वह्नितम । वह्नितम हविषा वाहकतम । **पितॄणां प्रथमा स्वधा ।** मुख्य पितृप्रीतिहेतुभूतस्त्वमेवेत्यर्थ । **ऋषीणा चरित सत्यमथर्वाङ्गिरसामसि ॥** अथर्वाङ्गिरसामृषीणा सत्यमुत्कृष्ट चरित नित्यनैमित्तिक विलक्षण कर्म त्वमसीत्यर्थ ॥ ८ ॥

इन्द्रस्त्व प्राण तेजसा रुद्रोऽसि परिरक्षिता । हे प्राण! त्वमिन्द्र परमेश्वर इत्यर्थ । इदि परमैश्वर्ये इति हि धातु । **तेजसा** सर्वसहरणसामर्थ्यलक्षणेन तेजसा त्व **रुद्रः** रोदनहेतु, स्थितिकाले

७ बलि हरन्तीति मूल तद्व्याख्यानभाष्य च क्वचिन्न दृश्यते। शाङ्करपाठरीत्या तदावश्यकमेव । अथापि तत्पाठसमतौ भाष्ये तुभ्यमित्यस्य त्वामुद्दिश्येत्यर्थो भाषितस्स्यात् न तु त्वदर्था इति । उपरि च यत इत्यध्याहृत्य वाक्यभेदकल्पना न युज्येत । अत तद्रहितपाठ उपलब्धो वास्तवस्स्यात्, यथा माध्वपाठे ।

९ त्व ज्योतिषा पतिरिति स्वपदाधिक्यात् ज्योतिषा पतिरिति

हरिः ओम् । अथ हैनं कौसल्यश्चाऽऽश्वलायनः पप्रच्छ । भगवन् ! कुत एष प्राणो जायते । कथमायात्यस्मिन् शरीरे । आत्मानं वा प्रविभज्य कथं प्रतितिष्ठते । केनोत्क्रमते । कथं बाह्यमभिधत्ते । कथमध्यात्ममिति ॥ १ ॥

तस्मै स होवाच-अतिप्रश्नान् पृच्छसि ब्रह्मिष्ठोऽसीति तस्मात् तेऽहं ब्रवीमि ॥ २ ॥

'आत्मन एवैष प्राणो जायते । यथैषा पुरुषे छायैतस्मिन् एतदाततं

अथ हैनं कौसल्यश्चाऽऽश्वलायनः पप्रच्छ । स्पष्टोऽर्थः । भगवन् कुत एष प्राणो जायते कथमायात्यस्मिञ्छरीरे । आत्मानं वा प्रविभज्य कथं प्रति(?)तिष्ठते । प्रतितिष्ठते । कथं बाह्यमभिधत्ते कथमध्यात्ममिति ॥ प्रतितिष्ठते प्रतितिष्ठतीत्यर्थः । बाह्यमभिधत्ते बाह्यरूपेण सन्निधत्ते इत्यर्थः, बाह्यमित्यस्य संनिधान-क्रियाविशेषणत्वात् ॥ १ ॥

तस्मै स होवाच । स्पष्टोऽर्थः । अतिप्रश्नान् पृच्छसि ब्रह्मिष्ठोऽसि (?) तस्मात् तेऽहं ब्रवीमि ॥ प्रश्नमतिक्रम्य वर्तमानान् प्रश्नायोग्यान् रहस्यान् अर्थान् पृच्छसि । तस्मात् त्वं ब्राह्मिष्ठोऽसि । प्रायेण ब्रह्मविदसि । न प्राकृत इति यावत् । अतस्तेऽहं योग्यं वाक्यवामीत्यर्थः ॥ २ ॥

प्रथमस्य प्रश्नस्योत्तरमाह — आत्मन एवैष प्राणो जायते । परमात्मन एवैष प्राणो जायत इत्यर्थः । 'एतस्माज्जायते प्राणो मन

---

१. कौसल्यश्चेति । अत्रैवं चकारश्रवणं नूनं पूर्वप्रश्नस्येवास्यापि प्राणविषयकत्वात् समुच्चयविशेषाभिप्रायेण ॥

२. आत्मन एवेति एवकारो न माध्वशांकरयोः ।

मनोकृतेनायात्यस्मिन् शरीरे ॥ ३ ॥

सर्वेन्द्रियाणि च" इति श्रुतेरिति द्रष्टव्यम् ।

'कथमायात्यस्मिन् शरीरे' इत्यस्योत्तरमाह—**यथैषा पुरुषे छायैतस्मिन्नेतदाततं मनोकृतेनाऽऽयात्यस्मिञ्छरीरे** । यथा पुरुषे गच्छति छायाऽपि सहैव गच्छति—न हि छायागमने सामर्थ्यन्तरमस्ति—एवम् **एतस्मिन्** पुरुषे जीवे, एतन्मन । **अकृतेन** अयत्नेन । कृतशब्दो यत्नार्थक । यत्नमन्तरेण **आततम्** अविनाभावेन सम्बन्नम्—एवमेव प्राणोऽप्यकृतेन अयत्नेनास्मिञ्छरीरे आयाति । मन प्राणयो पुरुषच्छायावत् पुरुषाविनाभूतत्वात् पुरुषेण सहैव प्राणस्य सञ्चार ।

मनोकृतेनेति पाठ एव शाङ्करसम्मतोऽपि । परन्तु 'मन कृतेनेत्यत्र सन्धिरार्षोऽयम् । बुद्धिपूर्वकपुण्यादिनेति तदर्थ'इति तत्र । अत्र तु अकृतेनेति सन्ध्यनुगुणच्छेदो दर्शित । एतदाततमित्यस्य प्राणाख्य वस्तु आततमित्यर्थ क्लीवनिर्देशात् क्लिष्ट । एवमपि, 'प्राण कथमायात्यस्मिन् शरीरे' इत्येतदुत्तरत्वादस्य वाक्यस्य, 'एष प्राण' इत्यस्य, 'जायते' इत्यनेनाऽऽयातीत्यनेनाप्यन्वय । यथा छायाया स्वयत्नं विनैव गति तथा प्राणस्यापीत्युत्तरमुक्तं भवति । ननु मन एव प्राणमत्र प्रेरयतीत्याशङ्कायां शङ्कानुद्भवाय मनस्सहितस्याऽऽगमनलाभाय च एतस्मिन्नेतदाततं मन इति मध्ये उक्तम् । प्राणपुरुषयो पूर्वमुपात्तत्वात् समाहारात् एतस्मिन्नित्यस्य प्राणविशिष्टपुरुषे इत्यर्थ । तदुक्तं 'पुरुषे जीवे' इति । आयातीति । पुरुषे आयाति सति प्राणोऽप्यायातीत्यर्थ । छाया मनसि प्राणे च दृष्टान्त । अकृतेनेति उभयान्वयि । मनोऽधिकृतेनेति अगोत्तरदातोपनिषत्कोशपाठेऽपि मन इति पृथक्पदं पूर्वान्वयि । अधि-

यथा सम्राडेवाधिकृतान् विनियुङ्क्ते एतान् ग्रामानेतान्[1] ग्रामान् अधितिष्ठस्वेति, एवमेवैष प्राणः इतरान् प्राणान् पृथक्पृथगेव संनिधत्ते ॥

पायूपस्थे अपानं चक्षुःश्रोत्रे मुखनासिकाभ्यां प्राणः स्वयं प्रा(प्रति)तिष्ठते, मध्ये तु समानः। एष ह्येतद्धुतमन्नं समं नयति। तस्मात्

अतो न प्राणाऽऽगमने पृथक्कारणमपेक्षितमिति भावः ॥ ३ ॥

'आत्मान प्रविभज्य कथं प्रतिष्ठते' इति तृतीयप्रश्नोत्तरमाह—

यथा सम्राडेवाधिकृतान् विनियुङ्क्ते एतान् ग्रामान् एतान् ग्रामानधितिष्ठस्वेति, एवमेवैष प्राण इतरान् प्राणान् पृथक्पृथगेव संनिधत्ते । यथा राजा कार्येष्वधिकृतान् स्वसेवकान्, 'इमान् ग्रामान् अधितिष्ठ, इमान् ग्रामानधितिष्ठेति पृथक्पृथक्विनियुज्य तन्मुखेन तेषु ग्रामेषु यथा(?) संनिधत्ते, एवमेवैष मुख्यप्राणः इतरेषु प्राणेषु ग्रामस्थानीयेषु स्वांशभूतापानव्यानादिमुखेन संनिधत्ते; अधितिष्ठतीति यावत् ॥

पायूपस्थेऽपानम् चक्षुःश्रोत्रे मुखनासिकाभ्यां प्राणः स्वयं प्रतितिष्ठते, मध्ये तु समानः । एष ह्येतद्धुतमन्नं समं नयति । तस्मादेताः सप्तार्चिषो भवन्ति ॥ तत्र—पायुश्चोपस्थं च पायूपस्थम्, तस्मिन् । [2]अपानं मूत्रपुरीषापकर्षणं कुर्वंस्तस्मिन् प्रतितिष्ठते प्रतिष्ठितो भवति; तदधिष्ठाता भवतीत्यर्थः । मुखनासिकाभ्यां निर्गतो वायुः प्राणरूपस्सन् चक्षुःश्रोत्रे—चक्षुश्च श्रोत्रं च चक्षुःश्रोत्रं

कृतेनेत्यादेः प्राणः स्वाधिष्ठितमनःप्रभृतिकरणवर्गेण सह छायावदायातीत्यर्थः । वक्ष्यति चैतत्प्रश्नान्ते मनसा सहाऽऽगमनमिति ॥

1 अधितिष्ठस्वेत्यधिकं माध्वे । 2. अपानमित्यस्य मूत्रपुरीषापकर्षणमित्यर्थः । अपान इति पाठे कुर्वन्नित्यन्तं तत्कार्यविवरणम् ।

देतास्सप्तार्चिषो भवन्ति ॥ ५ ॥

हृदि ह्येष आत्मा अत्रैतदेकशतं नाडीनाम् । तासां शतं शतमेकैकस्या (स्यां) द्वासप्तति(तिः) द्वासप्तति (तिः) प्रतिशाखानाडी-

---

तस्मिन् प्राणप्रभृति प्रतिष्ठितो भवति, तदधिष्ठाता भवतीत्यर्थः । मध्ये तु समानः सन्नवतिष्ठते । एष हि समानो हुतं भुक्तमन्नादिकं **समं नयति** सप्तधातुसाम्यं नयति । सप्तधातुरूपेण विभागं करोतीति यावत् । **तस्मात्** समानवायोर्हेतो, जाठराग्नेः सप्तार्चिषः ज्वालाः काली करालीत्येवमाद्याः प्रादुर्भवन्ति ॥ ५ ॥

हृदि ह्येष आत्मा । अत्रैकशतं नाडीनाम् । तासां शतं शतमेकैकस्या द्वासप्ततिर्द्वा (६) सप्तति प्रतिशाखानाडीसहस्राणि भवन्ति । एष जीवात्मा **हृदि** हृदये, यत्र समानरूपेण प्राण आस्ते तत्र, स्वयमपि वर्तते । अत्र हृदये नाडीनामेकाधिकं शतं वर्तते । तासां नाडीनां मध्ये एकैकस्या द्वासप्तति द्वासप्तति प्रभेदा भवन्ति । एकैकं

नयतेर्यथाश्रुते द्विकर्मकत्वात् सममित्यस्य साम्यमित्यर्थ उक्तः ।

६. एतदितिपदं भाष्ये न दृश्यते । परन्तु आनन्दगिरीये व्याख्यातम् । अत्र द्वासप्ततिर्द्वासप्ततिरिति प्रथमान्तपाठमादृत्य शाङ्करे व्याख्यातम्—"एकाधिकशते एकैकस्याः शतंशतं शाखानाड्यो भवन्ति । तत्रैकैकस्याः द्वासप्ततिः प्रतिशाखनाडीसहस्राणि भवन्ति" इति । नूनमत्र द्वासप्तति द्वासप्ततिमिति द्वितीयान्तपाठमनुरुध्य प्रतीत्येतत् पृथक्कृत्य तासामेकैकस्याः द्वासप्तति द्वासप्तति प्रति शतशतं शाखानाडीसहस्राणि भवन्तीत्येकवाक्यतयैव व्याख्यानम् । पाठश्चायं माध्वसंमतो दृश्यते । परन्तु तत्र व्याख्यानं क्लिष्टम् । 'तासामेकैकस्याः

स्त्रहस्त्राणि भवन्ति । आसु व्यानश्चरति ॥ ६ ॥

अथैकयोर्ध्व उदानः पुण्येन पुण्यं लोकं नयति ; पापेन पापम् ; उभाभ्यामेव मनुष्यलोकम् ॥ ७ ॥

द्वासप्ततिप्रभेदं प्रति शाखाभूतनाडीसहस्राणि शतंशतं भवन्ति । तासु **व्यानश्चरति** ॥ तासु नाडीषु व्यानरूपप्राणश्चरतीत्यर्थ ॥ ६ ॥

अथैकयोर्ध्व उदानः पुण्येन पुण्यं लोक नयति पापेन पापमुभाभ्यामेव मनुष्यलोकम् ॥ अथेति वाक्योपक्रमे । एकया कयाचिन्नाड्योर्ध्वमुख उदान. पुण्येन हेतुना पुण्यं स्वर्गादिलोकम्, पापेन हेतुना पापं नरकादिलोकम्, पुण्यपापाभ्यामेव मनुष्यलोकं नयति ॥

अत्र, 'आत्मानं वा प्रविभज्य कथं प्रतितिष्ठति' इति प्रश्नस्य, 'यथा सम्राडेवे'त्यारभ्य, 'उभाभ्यामेव मनुष्यलोक'मित्येतदन्तं प्रतिवचनम् । तन्मध्ये **अथैकयोर्ध्व उदानः पुण्येन पुण्यं लोक नयती**त्यनेन, 'केनोत्क्रमत' इति चतुर्थप्रश्नस्योत्तरमुक्तं भवति ॥ ७ ॥

शतंशतं भवन्ति । तत्रैकैकस्याः प्रतिशाखानाडीसहस्रद्वासप्तति जानीया'दिति हि तैः व्याख्यातम् । माध्वमूलोपनिषत्कोशे तु द्वासप्ततिमिति द्वितीयान्तमेव वीप्सारहितं दृश्यते । "शतं चैका च हृदयस्य नाड्यः तासां मूर्धानमभिनिस्सृतैका" इति कठाः (६) । हृदयात्पुरीततमभिप्रतिष्ठमानानां हितानामस्नाडीनां द्वासप्ततिसहस्रसंख्याकत्वमुक्तं बृहदारण्यके (४-१)। क्षुरिकोपनिषदि (४) च, "अथेमा दश नाड्यो भवन्ति । तासामेकैकस्यां द्वासप्ततिर्द्वासप्ततिः शाखानाडीसहस्राणि भवन्ति, यस्मिन्नयमात्मा स्वपिति" इति स्वप्नस्थानभूतनाडीनामपि तावत्संख्याकत्वमुक्तम् ॥

आदित्यो ह वै बाह्यः प्राण उदयति एष ह्येनं चाक्षुषं प्राणमनुगृह्णानः, पृथिव्यां या देवता, सैषा पुरुषस्यापानमवष्टभ्य । अन्तरा यदाकाशस्स समानः । वायुर्व्यानः ॥ ८ ॥

तेजो ह वा उदानः । तस्मादुपशान्ततेजाः पुनर्भवमिन्द्रियैर्मनसि

'कथं बाह्यमभिधत्ते' इत्यस्योत्तरमाह—**आदित्यो ह वै बाह्यः प्राण उदयत्येष ह्येनं चाक्षुषं प्राणमनुगृह्णानः ।** चाक्षुषं प्राणं चक्षुर्गोलकवर्तीन्द्रियम् आलोकाख्यसहकारिप्रदानेनानुगृह्णानो बहिः आदित्यरूपेणोदेति । यद्यपि प्राणस्याऽऽदित्यात्मकत्वं न संभवति; तयोर्भेदात्—तथापि प्राणकलायाः सर्वत्र सत्त्वेनाभेदोपचाराद्वा उपासनार्थतया वा बाह्यानामादित्यादीनां प्राणात्मकत्वोक्तिरिति द्रष्टव्यम् । **पृथिव्यां या देवता सैषा पुरुषस्यापानमवष्टभ्य ।** पृथिव्या या प्राणकलारूपा देवता, सा पुरुषस्यापानवाय्वधिष्ठितपायूपस्थेन्द्रिये अनुगृह्णाना वर्तत इत्यर्थः । ***अन्तरा यदाकाशः स समानः।*** आकाशाधिष्ठातृप्राणकलया आकाशस्यौपचारिकी अभेदोक्तिर्द्रष्टव्या । एवमुत्तरत्रापि । "मध्ये तु समानः । एष ह्येतद्धुतं नयति" इत्यध्यात्मं प्राणापानस्थानमध्यवर्तितया हि समानो निर्दिष्टः । बाह्याकाशस्यापि, बाह्यप्राणरूपस्य आदित्यस्य बाह्यापानरूपपृथिव्याश्च मध्यवर्तितया समानत्वं युज्यत इति भावः । **वायुर्व्यानः ।** बाह्यो वायुस्त्वगिन्द्रियाद्यनुग्रहतो व्यानरूपः ॥८॥

तेजो ह वा उदानः । बाह्यं तेजः उन्नयनहेतुत्वादुदानः । **तस्मादुपशान्ततेजाः पुनर्भवमिन्द्रियैर्मनसि संपद्यमानैर्यच्चित्तस्तेनैष प्राणमायाति ।** यस्माद्बाह्यं तेजः एवोदानशब्दितोन्नयन-

संपद्यमानैः ॥ ९ ॥ यच्चित्तस्तेनैष प्राणमायाति ।

हेतुत्वम्, तस्मादेव—उपशान्ततेजाः अपगतदेहौष्ण्यस्सन् एष मुमूर्षुर्जीवः यच्चित्तः यस्मिंश्चित्तं यस्य स यच्चित्तः-यत्काम इति यावत्-यादृशमनुष्यदेवादिजन्मकामो भवति, तत्कामनावशेन पुनर्भवशब्दितां पुनरुत्पत्तिं प्राप्तुम्, "वाङ्मनसि संपद्यते", "वाङ्मनसि दर्शनाच्छब्दाच्च" इति श्रुतिसूत्रतद्भाष्योक्तरीत्या मनसा संश्लेषविशेषमापन्नैर्वागादिभिर्दशभिरिन्द्रियैः सहितं प्राणं संमुमूर्षुर्जीव(?) आयाति ।

यद्यपि, "इममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ति' इति मुख्यामुख्यप्राणानां जीवोपगम एव श्रूयते ; न तु जीवस्य प्राणोपगमः। सूत्रितं च, "सोऽध्यक्षे तदुपगमादिभ्यः" [४।२।४] इति । तदर्थस्तु तदधिकरणभाष्ये उक्तः । तत्र हि—"यथा वाङ्मनसि संपद्यते मनः प्राणे" इति वचनानुरोधेन मनःप्राणयोरेव वाङ्मनसयोः संपत्तिः। तथा, 'प्राणस्तेजसि' इति वचनात् तेजस्येव प्राणः संपद्यत इति प्राप्ते-उच्यते-सोऽध्यक्षे इति । स प्राणः अध्यक्षे-करणाधिपे जीवे संपद्यते । कुतः ? तदुपगमादिभ्यः । प्राणस्य जीवोपगमस्तावच्छ्रूयते । "एवमेवेममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ति" इति । तथा जीवेन सह प्राणस्योत्क्रान्तिः श्रूयते, "तमुत्क्रामन्तं प्राणोऽनूत्क्रामति ; प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति" इति । प्रतिष्ठा च जीवेन सह श्रूयते "कस्मिन्नुत्क्रान्ते उत्क्रान्तो भविष्यामि । कस्मिन् वा प्रतिष्ठिते प्रतिष्ठास्यामि" इति । एवं जीवेन संयुज्य तेन सह तेजस्संपत्तिरिह 'प्राणस्ते-

प्राणस्तेजसा युक्त । स हात्मना यथासङ्कल्पित लोक नयति ॥ १

य एव विद्वान् प्राण वेद, न हास्य प्रजा हीयते, अमृतो भवति । तदेप श्लोक ॥ ११ ॥

जसि' इत्युच्यते । ततश्च प्राणो जीवेन सयुज्यैव तेजसि संबध्यते । यथा यमुनाया गङ्गया सयुज्य सागरगमनेऽपि, यमुना सागर गच्छतीति वचो न विरुध्यते, तद्वत् " इति भाषितम्— तथापि अस्य प्रकरणस्य प्राणप्रशमापरत्वाज्जीवस्य प्राणोपगमोक्तिरुपपद्यत इति द्रष्टव्यम् ।

प्राणस्तेजसा युक्त. स हात्मना यथासङ्कल्पित लोक नयति । अनन्तर "प्राणस्तेजसि, तेज परस्या देवतायाम्", इति श्रुत्युक्तरीत्या तेजसा परमात्मना च सयुक्त प्राण तत्तज्जीवात्मसङ्कल्पानुसारेण त त लोक म्रियमाण नयति । ततश्च तेजसा सहितस्यैव प्राणस्योन्नयनहेतुत्वात्तेजसोऽप्युन्नयनहेतुत्वेनोदानत्व युक्तमिति भाव । यद्यपि, प्राणस्तेजसि' इत्यत्र तेजश्शब्देन सर्वाणि भूतान्युच्यन्ते, न तेजोमात्रमिति 'भूतेषु तच्छ्रुते ' [ब्र० सू० ४।२।५।] 'नैकस्मिन् दर्शयतो हि' [ब्र० सू० ४।२।६] इति सूत्रभाष्ययो प्रतिपादितम्–तथाऽपि, "भूतान्तरसंसृष्टमेव तेज तेजश्शब्देनाभिधीयते" इति भाष्योक्तेस्तेजस प्राधान्यात् तदुक्तिरुपपद्यत इति द्रष्टव्यम् ॥ ९ ॥ १० ॥

य एव विद्वान् प्राण वेद न हास्य प्रजा हीयते अमृतो भवति । एवमुत्पत्त्यागमनप्रतिष्ठादिप्रकारेण प्राण य उपास्ते, तस्य पुत्रपौत्रादिलक्षणप्रजाहानिर्न भवति । परिशुद्धप्रत्यगात्मस्वरूपप्रतिपत्तिमुखेन ब्रह्मोपासननिष्पत्तिद्वारा मोक्षहेतुश्च भवतीति द्रष्टव्यम् ॥ **तदेप**

उत्पत्तिमायतिं स्थानं विभुत्वं चैव पञ्चधा। अध्यात्मं चैव प्राणस्य विज्ञायामृतमश्नुते विज्ञायामृतमश्नुत इति ॥ १२ ॥

इति तृतीयः प्रश्नः ॥

हरिः ओम्। अथ हैनं सौर्यायणी गार्ग्यः पप्रच्छ। भगवन्! एतस्मिन् कानि स्वपन्ति। कान्यस्मिन् जाग्रति। कतर एष देवः स्वप्नान् पश्यति। कस्यैतत् सुखं भवति। कस्मिन्नु सर्वे संप्रतिष्ठिता

श्लोकः। तत् प्राणवेदनमधिकृत्य प्रवृत्तोऽयं श्लोक इत्यर्थः ॥ ११ ॥

उत्पत्तिमायतिं स्थानं विभुत्वं चैव पञ्चधा। अध्यात्मं चैव प्राणस्य विज्ञायामृतमश्नुते विज्ञायामृतमश्नुत इति ॥ उत्पत्तिम्–प्राणस्य परमात्मन उत्पत्तिम्, मनसा सहाऽऽगमनमस्मिन् शरीरे, पायूपस्थादिस्थानेषु स्थितिम्, *'यथा सम्राडेवाधिकृतान्'* इत्युक्त स्वाम्य लक्षणं विभुत्वम्, अध्यात्मं प्राणादिरूपेण पञ्चधा स्थितिम्, चशब्द-*समुच्चितमादित्यादिरूपेण पञ्चधा बाह्यमवस्थानं च विज्ञाय अमृतं मोक्षम्* अश्नुते प्राप्नोति। द्विर्वचनं प्रतिवचनसमाप्तिद्योतनार्थम् ॥ १२ ॥

इति प्रश्नोपनिषत्प्रकाशिकायां तृतीयः प्रश्नः ॥

अथ हैनं सौर्यायणी गार्ग्यः पप्रच्छ। स्पष्टोऽर्थः। भगवन्नेतस्मिन् पुरुषे कानि स्वपन्ति। पुरुषे ; सुप्ते सतीति शेषः। शिष्टं स्पष्टम्। कान्यस्मिन् जाग्रति। अत्रापि, सुप्ते सतीति शेषः। कतर एष देवः स्वप्नान् पश्यति। एष द्योतनादिगुणयोगात् देवः जीवः कतरः कीदृशः सन् स्वप्नान् रथादीन् पश्यतीत्यर्थः। कस्यैतत्सुखं भवति। कस्य हेतोः एतद्वैषयिकं सुखमित्यर्थः। कस्मिन्नु सर्वे प्रतिष्ठिता

भवन्तीति ॥ १ ॥

तस्मै स होवाच—यथा गार्ग्य! मरीचयोऽर्कस्यास्तं गच्छतः सर्वा एतस्मिंस्तेजोमण्डले एकीभवन्ति, ताः पुनरुदयतः प्रचरन्ति—

भवन्तीति । स्पष्टोऽर्थः ॥ १ ॥

तस्मै स होवाच । स्पष्टोऽर्थः । यथा गार्ग्य ! मरीचयोऽर्कस्यास्तं गच्छतः सर्वा एतस्मिंस्तेजोमण्डले एकीभवन्ति, ताः पुनरुदयतः प्रचरन्ति-एवं ह वै तत् सर्वं परे देवे मनस्येकीभवति । यथा सायंकालेऽस्तं गच्छतः सूर्यस्य किरणाः नानादिक्षु प्रसरणं विना आदित्यमण्डले एकीभवन्ति, पुनश्च उद्यतः सूर्यस्य किरणाः नानादिक्षु

---

१ एष देव इति । यद्यपि—परे देवे मनसीति वक्ष्यमाणत्वात् स्वप्ने मनसः प्राधान्याच्च अत्र च पञ्चमवाक्ये च मनो गृह्यते सप्तमवाक्ये, परं आत्मनीति मनसः परो जीवात्मा उच्यते, एवं च नवमवाक्यं जीवपरं समन्वितम् । तत्र, परेऽक्षरे आत्मनीति तु परमात्मोच्यते इति सुवचम्; एवञ्चात्र 'एष हीत्यादिना प्रत्यगात्मा विशोध्यते' इति श्रुतप्रकाशिका, तत्सर्वमित्युक्तं सर्वशब्दार्थं पृथिवीत्यादिना विवृत्य परं आत्मनीत्युक्तजीवस्वरूपशोधनम् एष हीति क्रियत इत्यभिप्रायिका स्यात् । ततश्चात्र, कतर एष इति मनः, कस्येति जीवः, कस्मिन्निति परमात्मा चाभिसंधीयत इत्यपि स्यात्—अथापि, स्वपन्ति जाग्रतीत्यनयोरचेतनकर्तृकत्वेऽपि, पश्यतीत्यस्य चेतनकर्तृकत्वे स्वारस्यात् उपरि, पुरुषो न शृणोतीत्यादिप्रयोगाच्च, एष देव इति जीवपरमेव युक्तमित्याकल्प्यैव व्याख्यातम् । कस्येति । एतत्प्रश्नोत्तरे (६) सुखाश्रयोऽयमित्यनिर्दिश्य सुखनिमित्तस्यैव निर्देशात् प्रश्नवाक्येऽत्र तदनुरोधाय कस्य हेतोरिति भावितम् । उत्तरवाक्यं सौषुप्तिकसुखपरं शारीरे ।

एवं ह वै तत् सर्वं परे देवे मनस्येकीभवति । तेन तर्ह्येष पुरुषो न शृणोति, न पश्यति, न जिघ्रति, न रसयते, न स्पृशते, नाभिवदते, नादत्ते, नानन्दयते, न विसृजते, नेयायते ; स्वपितीत्याचक्षते ॥ २ ॥

प्राणाग्नय एव एतस्मिन् पुरे जाग्रति । गार्हपत्यो ह वा एषोऽ-

प्रसरन्तः प्रकाशका भवन्ति—एवमेतत्सर्वमिन्द्रियजातं परे इतरेभ्य उत्कृष्टे देवे द्योतनादिगुणयुक्ते मनस्येकीभवति । स्वस्वव्यापाराभिमुख्य विरोधिसंश्लेषविशेषयुक्तं भवतीत्यर्थः । तेन तर्ह्येष पुरुषो न शृणोति । तेन-श्रोत्रादीन्द्रियाणामुपरतत्वेनेत्यर्थः । शिष्टं स्पष्टम् । न पश्यति । न जिघ्रति । न रसयति । न स्पृशति । नाभिवदते । नाऽऽदत्ते । नानन्दयते न विसृजते नेयायते ; स्वपितीत्याचक्षते । आनन्दः उपस्थेन्द्रियकार्यम् । विसर्गस्तु पायुकार्यम् । नेयायते न गच्छतीत्यर्थः । स्वपितीत्याचक्षत इत्यनेन, 'कानि स्वपन्ती'ति प्रश्नस्य बाह्यज्ञानेन्द्रिय-कर्मेन्द्रियाणि स्वपन्तीत्युत्तरमुक्तं भवति । प्रत्येकमेकत्वाभिप्रायेण स्वपितीत्येकवचनम् । शिष्टं स्पष्टम् ॥ २ ॥

'कान्यस्मिञ्जाग्रति' इत्यस्योत्तरमाह-प्राणाग्नय एवैतस्मिन् पुरे जाग्रति । प्राणापानादिरूपा अग्नय एवैतस्मिन् पुरशब्दनिर्दिष्टे शरीरे जागरं कुर्वन्तीत्यर्थः । स्वापदशायां जाग्रत्सु प्राणादिपञ्चकोच्छ्वासनिश्वास मनोरूपेषु उपासनार्थमग्निहोत्रत्वसम्पत्तिं दिदर्शयिषु -तत्र व्याम्रियमाण

---

२ एयायते इति इण् गतौ यङन्तम् । प्राणनिरूपणे प्रपूर्व-ण्नीञधातुप्रयोगः 'केनोपनिषद्यपि (१-९) । ऐतरेयेऽपि, तं देवाः प्राणयन्त । स प्रणीतः (आ. २-७-५) इति ।

पानः व्यानोऽन्वाहार्यपचनः यत् गार्हपत्यात् प्रणीयते, प्रणयनादाहवनीयः प्राणः ॥ ३ ॥

यदुच्छ्वासनिश्वासौ, एतावाहुती । सम नयतीति समानः । मनो ह वाव यजमानः । इष्टफलमेवोदानः । स एनं यजमानमहरहर्ब्रह्म गमयति ॥ ४ ॥

मन एव यजमान, अपानो मूलाधारस्थतया गार्हपत्य, तत्संनिहितो व्यानोऽन्वाहार्यपचनशब्दितो दक्षिणाग्नि, अपानवायुमूलक प्राणो गार्हपत्यात्प्रणीयमानाहवनीयतुल्यतयाऽऽहवनीय, तदाधारकौ उच्छ्वासनिश्वासौ 'द्वे आहवनीये' इति निर्दिष्टाहुतिद्वयम्, उच्छ्वासनिश्वासहेतुभूत समानो वायु 'आहुती समं नयति' इति निर्देशयोग्याध्वर्यु, उदानवायुस्तु यजमानस्य लोकान्तरोन्नयनहेतुत्वात् उदान [कर्मफलम्?] इत्यग्निहोत्राहुत्यवयवभूतान् यजमानाग्नित्रयाहुतिद्वयाध्वर्युकर्मफलभूतान् अत्रापि पदार्थान् प्राणादिपञ्चकोच्छ्वासनिश्वासमनोरूपेष्वष्टसु दर्शयति-- **गार्हपत्यो ह वा एषोऽपानो व्यानोऽन्वाहार्यपचनो यद्गार्हपत्यात्प्रणीयते प्रणयनादाहवनीयः प्राणः । यदुच्छ्वासनिश्वासावेतावाहुती । सम नयतीति समानः । मनो ह वाव यजमानः। इष्टफलमेवोदानः । स एनं यजमानमहरहर्ब्रह्म गमयति ॥** अत्र यद्यपि जीवस्यैव 'एवमेवेमा सर्वा प्रजा अहरहर्गच्छन्त्य एत ब्रह्मलोक न विन्दन्ति' [छा० ८।३।२] इति ब्रह्मगमन श्रुत्वे, न मनस –तथाऽपि मनस पुरीतद्गमनश्रवणात् तद्गतब्रह्मगमयितृत्वोक्तिरुपपद्यत इति द्रष्टव्यम् ॥ ३ ॥ ४ ॥

अत्रैष देवः स्वप्ने महिमानमनुभवति । यद् दृष्टंदृष्टमनुपश्यति, श्रुतंश्रुतमेवार्थमनुशृणोति, देशदिगन्तरैश्च प्रत्यनुभूतं पुनःपुनः प्रत्यनुभवति, दृष्टं चादृष्टं च श्रुतं चाश्रुतं च अनुभूतं चाननुभूतं च सच्चासच्च सर्वं पश्यति ; सर्वः पश्यति ॥ ५ ॥

स यदा तेजसाऽभिभूतो भवति, अत्रैष देवः स्वप्नान्न पश्यति ।

कतर एष देवः स्वप्नात् पश्यतीत्यस्योत्तरमाह— अत्रैष देवः स्वप्ने महिमानमनुभवति, यद् दृष्टंदृष्टमनुपश्यति, श्रुतं श्रुतमेवार्थमनुशृणोति, देशदिगन्तरैश्च प्रत्यनुभूतं पुनःपुनः प्रत्यनुभवति, दृष्टं चादृष्टं च श्रुतं चाश्रुतं चानुभूतं चाननुभूतं च सच्चासच्च सर्वं पश्यति सर्वः पश्यति । स यदा तेजसाऽभिभूतो भवति, अत्रैष देवः स्वप्नान्न पश्यति । अत्र अस्मिन्नवसरे एष देवः जीवः स्वप्ने करितुरगादिलक्षणं महिमानमनुभवति पश्यति । जागरे प्राक् यद् दृष्टम् , तमेवार्थमनुपश्यति । अनु-पश्चात् पश्यति-अनुभवति । दृष्टं दृष्टं-भूयो दृष्टमित्यर्थः । श्रुतमेवार्थमनुशृणोति । देशान्तरेषु दिगन्तरेषु प्रत्यहमनुभूतमर्थं पुनः पुनरनुभवति । दृष्ट श्रुतमेवानुभवतीत्ययमपि नियमो नास्ति ; कदाचित् पूर्वाननुभूतमपि स्वशरीरच्छेदनादिकमनुभवति । विद्यमानं चानुभवति ; अविद्यमानं चानुभवति । सर्वः पश्यति सर्वः सन् पश्यति । द्रष्टा श्रोता घ्राता मन्ता वक्ता चेत्यादि-सर्वरूपः सन् पश्यतीत्यर्थः । तदानीं जागरीयबाह्यज्ञानकर्मेन्द्रियाणामुपरतव्यापारत्वेऽपि स्वाप्निकैरीश्वरसृष्टैः शरीरेन्द्रियैर्द्रष्टृत्वादिमान् सन् अनुभवतीति भावः ॥ ५ ॥ एतस्मिन्नन्तरे, "सता सोम्य तदा संपन्नो

अथ य (त) देतस्मिन् शरीरे [एतत्] सुखं भवति ॥ ६ ॥

स यथा सोम्य वयांसि वासोवृक्षं संप्रतिष्ठन्ते—एवं ह वै तत् सर्वं पर आत्मनि संप्रतिष्ठते ॥ ७ ॥

पृथिवी च पृथिवीमात्रा च आपश्चापोमात्रा च तेजश्च तेजोमात्रा च वायुश्च वायुमात्रा च आकाशश्चाकाशमात्रा च चक्षुश्च द्रष्टव्यं च श्रोत्रं च श्रोतव्यं च घ्राणं च घ्रातव्यं च रसनञ्च (रसश्च)

भवति", "तेजसा हि तदा सपन्नो भवति" इति श्रुत्युक्तरीत्या परप्रकाशकतया तेज शब्दितेन परमात्मना **अभिभूतो भवति** सपन्नो भवति=सपरिष्वक्तो भवतीति यावत्, तदा स्वाप्नान् पदार्थान् पश्यतीत्यर्थ । ततश्च कतर एष देव स्वप्नान् पश्यतीति प्रश्नस्य ब्रह्मसपत्तिविरहदशाया मनोमात्रपरिशेषसमये स्वाप्नान् पदार्थान् पश्यतीत्युत्तरमुक्त भवति ।

'कस्यैतत्सुख भवती'त्यस्योत्तरमाह-**अथ य(त)देतस्मिञ्छरीरे (एतत्)सुख भवति** । यत् सुख भवति, तदेतस्मिञ्छरीरे सत्येव भवतीत्यर्थ । शरीरमेव वैषयिकसुखहेतुरित्युक्त भवति, 'अशरीरं वाव सन्त न प्रियाप्रिये स्पृशत '[छा० ८।१२।१] इति श्रुतेरिति द्रष्टव्यम् ॥६

कस्मिन् सर्वे प्रतिष्ठिता भवन्तीत्यस्योत्तरमाह—**स यथा सोम्य वयांसि वासोवृक्ष सप्रतिष्ठन्ते, एव ह वै तत् सर्वं परे आत्मनि संप्रतिष्ठते।** वयांसि पक्षिण वासोवृक्ष निवासवृक्ष प्रति सप्रतिष्ठन्ते । स दृष्टान्तो यथा, एव परमात्मनि सर्वं प्रतिष्ठित भवतीत्यर्थ ॥ ७ ॥

सर्वशब्दार्थं प्रपञ्चयति—**पृथिवी च पृथिवीमात्रा च** ॥ अत्र पृथिवीमात्राशब्देन पुराणेषु गन्धतन्मात्रशब्दाभिलप्या पृथिवीपूर्वावस्थोच्यते । एवमुत्तरेष्वपि मात्राशब्देषु द्रष्टव्यम् । **आपश्चापोमात्रा च**

अत्रैष देवः स्वप्ने महिमानमनुभवति। यद् दृष्टदृष्टमनुपश्यति, श्रुतश्रुतमेवार्थमनुशृणोति, देशादिगन्तरैश्च प्रत्यनुभूत पुन पुन॰ प्रत्यनुभवति, दृष्ट चादृष्टं च श्रुत चाश्रुतं च अनुभूत चाननुभूत च सच्चासच्च सर्वं पश्यति, सर्वः पश्यति ॥ ५ ॥

स यदा तेजसाऽभिभूतो भवति, अत्रैष देव॰ स्वप्नान्न पश्यति।

कतर एष देव स्वप्नात् पश्यतीत्यस्योत्तरमाह — अत्रैष देवः स्वप्ने महिमानमनुभवति, यद् दृष्टदृष्टमनुपश्यति, श्रुत श्रुतमेवार्थं मनुशृणोति, देशदिगन्तरैश्च प्रत्यनुभूत पुनःपुनः प्रत्यनुभवति, दृष्ट चादृष्टं च श्रुत चाश्रुतं चानुभूत चाननुभूत च सच्चासच्च सर्वं पश्यति सर्वः पश्यति। स यदा तेजसाऽभिभूतो भवति, अत्रैष देवः स्वप्नान्न पश्यति। अत्र अस्मिन्नवसरे एष देवः जीव स्वप्ने करितुरगादिलक्षण महिमानमनुभवति पश्यति। जागरे प्राक् यद् दृष्टम्, तमेवार्थमनुपश्यति। अनु-पश्चात् पश्यति-अनुभवति। दृष्ट दृष्ट-भूयो दृष्टमित्यर्थ। श्रुतमेवार्थमनुशृणोति। देशान्तरेषु दिगन्तरेषु प्रत्यक्षमनुभूतमर्थं पुन पुनरनुभवति। दृष्ट श्रु मेवानुभवतीत्ययमपि नियमो नास्ति, कदाचित् पूर्वाननुभूतमपि स्वशरीरच्छेदनादिकमनु भवति। विद्यमान चानुभवति, अविद्यमान चानुभवति। सर्वः पश्यति सर्व सन् पश्यति। द्रष्टा श्रोता घ्राता गन्ता वक्ता चेत्यादि-सर्वरूप सन् पश्यतीत्यर्थ। तदानीं जागरीयज्ञानज्ञानकर्मेन्द्रियाणामुप रतव्यापारत्वेऽपि स्वाप्निकैरीश्वरसृष्टै शरीरेन्द्रियैर्द्रष्टृत्वादिमान् सन् अनुभवतीति भाव ॥ ५ ॥ एतस्मिन्नन्तरे, "सता सोम्य तदा संपन्नो

अथ य (त) देतस्मिन् शरीरे [एतत्] सुख भवति ॥ ६ ॥

स यथा सोम्य वयांसि वासोवृक्ष संप्रतिष्ठन्ते—एव ह वै तत् सर्व पर आत्मनि संप्रतिष्ठते ॥ ७ ॥

पृथिवी च पृथिवीमात्रा च आपश्चापोमात्रा च तेजश्च तेजोमात्रा च वायुश्च वायुमात्रा च आकाशश्चाकाशमात्रा च चक्षुश्च द्रष्टव्य च श्रोत्र च श्रोतव्य च घ्राण च घ्रातव्य च रसनश्च (रसश्च)

भवति", "तेजसा हि तदा सपन्नो भवति" इति श्रुत्युक्तरीत्या पर-प्रकाशकतया तेज शब्दितेन परमात्मना **अभिभूतो भवति** सपन्नो भवति=सपरिष्वक्तो भवतीति यावत्, तदा स्वाप्नान् पदार्थान्न पश्यती-त्यर्थ। ततश्च कतर एष देव स्वप्नान् पश्यतीति प्रश्नस्य ब्रह्मसपत्तिविरहद शाया मनोमात्रपरिशेषसमये स्वाप्नान् पदार्थान् पश्यतीत्युत्तरमुक्त भवति।

'कस्यैतत्सुख भवती'त्यस्योत्तरमाह–अथ य(त)देतस्मिञ्छरीरे (एतत्) सुख भवति। यत् सुख भवति, तदेतस्मिञ्छरीरे सत्येव भवतीत्यर्थ। शरीरमेव वैषयिकसुखहेतुरित्युक्त भवति, 'अशरीरं वाव सन्त न प्रियाप्रिये स्पृशत' [छा० ८।१२।१] इति श्रुतेरिति द्रष्टव्यम्॥६

कस्मिन् सर्वे प्रतिष्ठिता भवन्तीत्यस्योत्तरमाह—**स यथा सोम्य वयांसि वासोवृक्ष सप्रतिष्ठन्ते, एव ह वै तत् सर्वं परे आत्मनि सप्रतिष्ठते। वयांसि** पक्षिण **वासोवृक्ष** निवासवृक्ष प्रति **सप्रतिष्ठन्ते**। स दृष्टान्तो यथा, एव परमात्मनि सर्वं प्रतिष्ठित भवतीत्यर्थ ॥ ७ ॥

सर्वशब्दार्थं प्रपञ्चयति—**पृथिवी च पृथिवीमात्रा च** ॥ अत्र पृथिवीमात्राशब्देन पुराणेषु गन्धतन्मात्रशब्दाभिलप्या पृथिवीपूर्वावस्थो च्यते। एवमुत्तरेष्वपि मात्राशब्देषु द्रष्टव्यम्। **आपश्चापोमात्रा च**

रसयितव्यं च त्वक् च स्पर्शयितव्यं च वाक् च वक्तव्यं च हस्तौ चाऽऽदातव्यं च उपस्थश्चाऽऽनन्दयितव्यं च पायुश्च विसर्जयितव्यं च पादौ च गन्तव्यं च मनश्च मन्तव्यं च बुद्धिश्च बोद्धव्यं च अहङ्कारश्चाहंकर्तव्यं च चित्तं च चेतयितव्यं च तेजश्च विद्योतयितव्यं च प्राणश्च विधारयितव्यं च ॥ ८ ॥

एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः । स परेऽक्षरे आत्मनि संप्रतिष्ठते ॥ ९ ॥

तेजश्च तेजोमात्रा च वायुश्च वायुमात्रा च आकाशश्चाऽऽकाशमात्रा च चक्षुश्च द्रष्टव्यं च श्रोत्रं च श्रोतव्यं च घ्राणं च घ्रातव्यं च रसनश्च(रसश्च) रसयितव्यं च त्वक् च स्पर्शयितव्यं च वाक्च

....

नात्मा पुरुषः । स परेऽक्षरे आत्मनि संप्रतिष्ठते । चेतनाचेतनरूपः कर्तृकरणकर्मरूपः सर्वोऽपि प्रपञ्चस्तदाश्रित इति भावः । अत्र बोद्धा कर्ता विज्ञानात्मेति निर्देशात्, 'आत्मनो ज्ञातृत्वमेव, न ज्ञानरूपत्वमिति वदन्तस्तार्किकाः (श्च) 'ज्ञानत्वमेव न ज्ञातृत्वम्' इति वदन्तो मृषावादिनश्च निरस्ता भवन्ति ॥ ८ ॥ ९ ॥

८-९. पृथिवी चेत्यादि पुरुष इत्यन्तं सर्वमिति शब्दस्यार्थप्रपञ्चनम् । तेजश्च विद्योतयितव्यश्चेत्यत्र तेजश्शब्देन जाठरतेजो ग्राह्यं स्यात् । यद्वा शांकरोक्तमस्तु, 'तेजः त्वगिन्द्रियव्यतिरेकेण प्रकाशविशिष्टा या त्वक् तया निर्भास्यो विषयो विद्योतयितव्यम्' इति । अथवा तेजश्चेतनेति माध्वटीका साधिष्ठा । मृषावादिनश्चेति चकारेण कर्तृत्वमात्मनि नेति वदन्तस्सांख्याश्च समुच्चीयन्ते । एवं विलक्षणात्मस्वरूपवचनात् प्रत्यगात्मशोधकमिदं वाक्यमिति ॥

परमेवाक्षरं प्रतिपद्यते स यो ह वै तदच्छायमशरीरमलोहितं शुभ्रमक्षरं वेदयते यस्तु (१)सौम्य, स सर्वज्ञस्सर्वो भवति। तदेष श्लोकः ॥ १० ॥

विज्ञानात्मा सह देवैश्च सर्वे प्राणा भूतानि सम्प्रतिष्ठन्ति यत्र।

परमेवाक्षरं प्रतिपद्यते स यो ह वै तदच्छायमशरीरमलोहितं शुभ्रमक्षरं वेदयते यस्तु सौम्य, स सर्वज्ञः सर्वो भवति॥ छायाशब्देन ज्ञानसङ्कोचकं कर्मोच्यते। अच्छायमपापमित्यर्थः। अत एवाशरीरम् अलोहितं रूपादिशून्यं शुभ्रं स्वप्रकाशम् अक्षरं क्षरणशून्यं परमात्मानं वेदयते जानाति, स हे सौम्य प्रियदर्शन! परमेवाक्षरं ब्रह्म वासुदेवं प्रतिपद्य सर्वज्ञो भवति। सर्वो (र्वा) भवति सर्वकामयुक्तो भवति। तदेष श्लोकः। तद् ब्रह्माभिमुखीकृत्यैष श्लोक इत्यर्थः ॥१०॥

विज्ञानात्मा सह देवैश्च सर्वैः प्राणा भूतानि सम्प्रतिष्ठन्ति यत्र। शुभ्रमक्षरं वेदयते यस्तु सौम्य स सर्वज्ञः सर्वमेवाऽऽवि

१० अच्छायमित्यस्य प्रसिद्धच्छायारहितमित्यर्थोऽपि भाव्ते। आत्मस्वरूपस्यामूर्तस्य छायाऽयोगात् दिव्यमङ्गलविग्रहस्यापि निरतिशयज्योतिष तदसम्भवात्। अतेजसो हि तेज:प्रतिघातिनः छाया भवतीति—अथापि अशरीरमित्यत्र हेतुपरतया अपापमिति व्याख्यातम्॥ वेदयत इत्यस्य पुनरावृत्त्या, यस्तु वेदयते स सर्वज्ञ इति यच्छब्दद्वयस्य निर्वाह आनन्दगिरीये। अत्र तु यो ह वै तद्वेदयते तादृशस्स तु य परमेवाक्षरं प्रतिपद्यते स सर्वज्ञ इत्यन्वयो विवक्षित इव। यद्वा यस्तु इत्यत्र प्रतिपद्यत इत्यस्य पुनरावृत्त्या तदादि पृथग्वाक्यम्।

शुभ्रमक्षरं वेदयते यस्तु (?) सौम्य स सर्वज्ञस्सर्वमेवाऽऽविवेशेति॥
इति चतुर्थः प्रश्नः ॥

हरिः ओम् । अथ हैनं शैव्यस्सत्यकामः पप्रच्छ । स यो ह वै तद्भगवन्! मनुष्येषु प्रायणान्तमोङ्कारमभिध्यायीत, कतमं वाव स तेन लोकं जयतीति ॥ १ ॥

तस्मै स होवाच—एतद्वै सत्यकाम! परं चापरं च ब्रह्म यदोङ्कारः । तस्माद्विद्वान् एतेनैवायनेनै(वाऽयतनेने)कतरमन्वेति ॥२

वेशेति ॥ सर्वेर्देवैः वागादीन्द्रियैः सह मुख्यप्राणाः भूतानि महाभूतानि च जीवात्मा च यत्र प्रतितिष्ठन्ति, तादृशं शुभ्रं स्वप्रकाशम् अक्षरं निर्विकारं परमात्मानं यो जानाति, स सर्वज्ञः सर्वमपि कामजातम् आविवेश आविशति । 'सर्वेषु लोकेषु कामचारो भवति' इति श्रुत्युक्तरीत्या काम्यमानसर्वलोकसंचारी भवतीत्यर्थः ॥ ११ ॥

इति प्रश्नोपनिषत्प्रकाशिकायां चतुर्थः प्रश्नः ॥ ४ ॥

अथ हैनं शैब्यः सत्यकामः पप्रच्छ । स्पष्टोऽर्थः । स यो ह वै तद् भगवन् मनुष्येषु प्रायणान्तमोंकारमभिध्यायीत, कतमं वाव स तेन लोकं जयतीति । ह वै इति प्रसिद्ध्यतिशये । तदित्येतदव्ययम् । स इत्येतदधिकारिसामान्यपरम् । अयमर्थः –हे भगवन् पूजार्ह ! योऽधिकारी मनुष्याणां मध्ये मरणान्तमोंकारमभिध्यायति, स कतमं लोकं तेनोंकारेण प्राप्नोतीत्यर्थः । वावशब्दोऽवधारणे, प्रसिद्धौ वा ॥१

तस्मै स होवाच । स्पष्टोऽर्थः । एतद्वै सत्यकाम परं चापरश्च ब्रह्म यदोंकारः । तस्माद् विद्वानेतेनैवाऽऽयतनेनैकतरमन्वेति । हे सत्यकाम ! एतदेव परं चापरं च ब्रह्म । उभयवाचक

स यद्येकमात्रमभिध्यायीत, स तेनैव संवेदितस्तूर्णमेव जगत्यामभिसंपद्यते। तमृचो मनुष्यलोकमुपनयन्ते। स तत्र तपसा ब्रह्मचर्येण श्रद्धया संपन्नो महिमानमनुभवति ॥ ३ ॥

मित्यर्थ । वाच्यवाचकभावनिबन्धन सामानाधिकरण्यम्। तथैव व्यासार्यैरीक्षतिकर्माधिकरणे व्याख्यातत्वात्। किं तदित्यत्राऽऽह— यदोङ्कार इति। तस्मादुपासक एतेनैवोंकाररूपेण मार्गेणैकतरं परमपर वा ब्रह्म अन्वेति उपास्त इत्यर्थ ॥ २ ॥

स यद्येकमात्रमभिध्यायीत, स तेनैव सवेदितस्तूर्णमेव जगत्यामभिसपद्यते। स उपासक **यद्येकमात्र** ह्रस्व प्रणवमपरब्रह्मवाचकम**भिध्यायीत,** अपरब्रह्मवाचकेन ह्रस्वेन प्रणवेन योऽपर ब्रह्मोपास्ते, स **तेनैव** —एकमात्रोङ्कारकरणकापरब्रह्मध्यानेनैव **सवेदित:**—लब्धसत्ताक **जगत्यां** भुवि **अभिसपद्यते** अभि अभ्यर्हित श्रेष्ठ सपद्यते। **तमृचो मनुष्यलोकमुपनयन्ते।** तमृच्मन्त्रा मनुष्यलोक प्रापयन्ति। **स तत्र तपसा ब्रह्मचर्येण श्रद्धया सपन्नो महिमानमनुभवति।** स मनुष्यलोक नीत **तपसा** अनशनादिना, **ब्रह्मचर्येण** मैथुनवर्जनेन, **श्रद्धया** आस्तिक्यबुद्ध्या यदि सपन्नो भवति, तदा

---

२ तथैवेति। न तु अवाच्यब्रह्मवादिशाङ्करमत इव ओंकारे ब्रह्मदृष्टिपरतयेति भाव। अन्वेतीत्यस्यान्तिममन्त्र इव प्राप्त्यर्थकत्वमपि सभवति। अथापि आदिमफलद्वयानुभवकाले ब्रह्मानुभवाभावात् उपासनपरतया योजनमादृतम् ॥

३ मात्राशब्द प्रणवघटकाकारादिवर्णेष्वपि माण्डूक्यादौ प्रयुज्यते, अथाप्यत्र चतुर्थार्धमात्रावकथनात् कृत्स्न ओंकारे एकमात्रत्वादिकथनाच्चाथर्वशिखोक्तह्रस्वादिमात्राग्रहणम् ॥

अथ यदि द्विमात्रेण मनसि संपद्यते, सोऽन्तरिक्षं यजुर्भिरुन्नीयते सोमलोकम् । स सोमलोके विभूतिमनुभूय पुनरावर्तते ॥४॥

यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत, स तेजसि सूर्ये संपन्नः—यथा पादोदरस्त्वचा विनिर्मुच्यत एवं ह

महिमानं श्रेयस्साधकं ब्रह्मोपासनमनुतिष्ठतीत्यर्थः। न च एचो ह्रस्वाभावात् कथमोंकारस्य ह्रस्वत्वमिति शङ्कनीयम्; न्यूङ्खे ह्रस्वस्य ओंकारस्य दर्शनात्॥

अथ यदि द्विमात्रेण मनसि संपद्यते । द्विमात्रेणापरब्रह्मवाचकेन प्रणवेन यस्य मनसि अपरब्रह्मध्यानं संपद्यते—सोऽन्तरिक्षं यजुर्भिरुन्नीयते सोमलोकम् । सः अन्तरिक्षाश्रितं सोमलोकं द्विमात्रोपासकः पुमान् यजुर्मन्त्रैरुन्नीयते । अत्र अन्तरिक्षसोमलोकशब्द ऊर्ध्वमात्रोपलक्षक आमुष्मिकमात्रपरः । अत एव ईक्षतिकर्माधिकरणभाष्ये, "यत् अपरं कार्यं ब्रह्म निर्दिष्टम्, तत् ऐहिकामुष्मिकत्वेन द्विधा विभज्य, एकमात्रं प्रणवमुपासीनानामैहिकं मनुष्यलोकप्राप्तिरूपं फलमभिधाय द्विमात्रमुपासीनानामामुष्मिकमन्तरिक्षशब्दोपलक्षितं फलं चाभिधाय" इत्युक्तम् । सः सोमलोके विभूतिमनुभूय पुनरावर्तते । अमुष्मिन्नैश्वर्यमनुभूय तत्पुण्यावसाने पुनरावर्तते ॥ ४ ॥

यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत । यस्तु एकमात्रद्विमात्रत्वदशायामर्वाचीनफलसाधनेन एतेनैवाक्षरेण परमात्मानमभिध्यायति आभिमुख्येन ध्यायति—निरन्तरं ध्यायतीत्यर्थः । स तेजसि सूर्ये संपन्नः, यथा पादोदरस्त्वचा

न्यूङ्खः ओकारषोडशत्वादि। पृष्ठयषडहादौ मन्त्रे अनेकार्थीकार-

वै स पाप्मना विनिर्मुक्तः स सामभिरुन्नीयते ब्रह्मलोकम् । स विनिर्मुच्यते, एव ह वै स पाप्मना विनिर्मुक्तः, स सामभिरुन्नीयते ब्रह्मलोकम् । स उपासक तेजोमण्डले सूर्ये सगत सन् — उदरमेव पादो यस्य स **पादोदरः**; सर्प इति यावत्—यथा सर्पो जीर्णया त्वचा विनिर्मुक्तो भवति, एव पाप्मना विनिर्मुक्त सन् भगवल्लोकं वैकुण्ठं सामभिर्गीतिप्रधानैर्मन्त्रैरुन्नीयते । अत्र व्यासार्यै — **स पाप्मना विनिर्मुक्त** इति तच्छब्दान्तरश्रवणात् **स सामभिरित्येक**-वचमाश्रित्य, 'सामगानसहितैरिति वा सान्त्ववचनसहितै पुरुषैरिति वाऽर्थ' इति ईक्षतिकर्माधिकरणे व्याख्यातम् ॥ **स एतस्माज्जीव-घनात् परात् पर पुरिशयं पुरुषमीक्षते** । ईक्षतिकर्माधिकरणे, "यस्य हि कर्मनिमित्तं देहित्वम्, स जीवघन इत्युच्यते । चतुर्मुखस्यापि तच्छ्रूयते, "यो ब्रह्माण विदधाति पूर्वम्" इति भाष्योक्ते जीवघन-शब्देन ससारिमण्डलमुच्यते । "मूर्तौ घन" इति काठिन्यशब्दितमूर्तौ घनशब्दस्य निपातितत्वात् , देहद्वारत्वादात्मनि काठिन्यस्य, घनशब्दो देहिपर एव । तस्मात् पर परिशुद्धात्मा । तस्मादपि परमूं **पुरिशयम्**- "पू· प्राणिन सर्वे एव गुहाशयस्य" इति सर्वेषु प्राणिष्वन्तरात्मतया शयानम् , "भगवानिति शब्दोऽयं तथा पुरुष इत्यपि । निरुपाधी च वर्तेते वासुदेवे सनातने" इति निरुपाधिकपुरुषशब्दवाच्यं भगवन्तं परवासुदेवमीक्षत इत्यर्थ । अत एव, "स सामभिरुन्नीयते ब्रह्मलोकम्" इत्यत्र ब्रह्मलोकशब्दस्य चतुर्मुखलोकपरत्वशङ्का व्युदस्ता, तद्गतानां

५. पूर्वमृव इति यजुर्भिरिति च श्रवणादत्रापि सामभिरिति

एतस्माज्जीवघनात् परात्परं पुरिशयं पुरुषमीक्षते । तदेतौ श्लोकौ भवतः ॥ ५ ॥

तिस्रो मात्रा मृत्युमन्त्यः प्रयुक्ताः अन्योन्यसक्ता अनविप्रयुक्ताः ।
क्रियासु बाह्या[भ्य]न्तरमध्यमासु सम्यक् प्रयुक्तासु न कम्पते ज्ञः ॥ ६

परवासुदेवेक्षणासंभवादिति द्रष्टव्यम् । तदेतौ श्लोकौ भवतः । तत् ओंकारध्यानमधिकृत्य वक्ष्यमाणौ श्लोकौ प्रवृत्तावित्यर्थः ॥ ५ ॥

तिस्रो मात्रा मृत्युमन्त्यः प्रयुक्ताः अन्योन्यसक्ता अनविप्रयुक्ताः। अविप्रयुक्ता न भवन्तीत्यनविप्रयुक्ताः। विप्रयुक्ता इति यावत् । अत्यन्तद्रुतोच्चारणेनान्योन्यसक्ततया, अतिविप्रकृष्टकालतयाऽत्यन्तविप्रयुक्ततया वा प्रयुक्तास्तिस्रो मात्राः मृत्युमन्त्यः मृत्युप्रदा अनर्थावहा इति यावत् । मृत्युमत्य इति पाठेऽपि स एवार्थः। क्रियासु बाह्यान्तरमध्यमासु सम्यक्प्रयुक्तासु न कम्पते ज्ञः ॥ यज्ञादिका बाह्याः क्रियाः, आन्तरा मानसक्रियाः, मध्यमा वाचिकजपरूपाः। आसु क्रियासु तिसृषु मात्रासु सम्यक् अत्यन्तसंयोगविप्रयोगमन्तरेण प्रयुक्तासु सतीषु ज्ञः तत्तत्प्रयोगाभिज्ञः पुमान् न कम्पते फलान्न च्यवत इत्यर्थः ॥ ६ ॥

ऋग्भिरेतं यजुर्भिरन्तरिक्षं सामभिर्यत्तत् कवयो वेदयन्ते । तमोंकारेणैवाऽऽयतनेनान्वेति विद्वान् यत्तच्छान्तमज-

पदविभाग उचितः, अन्तिममन्त्रानुसाराच्च । स इति तु पृथक् । स तेजसि, स पाप्मना इति तच्छन्दद्वयवत् तच्छन्दद्वयमप्युपपद्यते, अवान्तरक्रियाभेदेन विभिन्नतच्छन्दप्रयोगस्य बहुलं दर्शनादिति भावेनाह सामभिरिति ॥ ऋगादीनां भूर्भुवस्सुवरिति लोकत्रयाभिव्याहृतित्रयजन्यत्वरूपसंबन्धो मनुस्मृ (२-७६)त्युक्तरीत्याऽस्ति । अथाप्यत्र तृतीयलोकः परं पदमितीक्षतिकर्माधिकरणे व्यक्तम् ।

ऋग्भिरेतं यजुर्भिरन्तरिक्षं सामभिर्यत्तत् कवयो वेदयन्ते । तमोङ्कारेणै-
वाय[न]नेनान्वेति विद्वान् यत्तच्छान्तमजरममृतमभय परं चेति ॥७॥

इति पञ्चम· प्रश्नः ।

रममृतमभय पर चेति ॥ [स विद्वान्] **एतं** मनुष्यलोकमित्यर्थ । **यत्तत् कवयो वेदयन्ते** । कवयः क्रान्तदर्शिन । 'तद्विष्णो परम पद सदा पश्यन्ति सूरय ' इत्युक्तरीत्या सूरयो यं लोक पश्यन्ति, तम् — ओंकारेणैव मार्गेणान्वेति । गत्वा च **शान्तम्**–ऊर्मिषट्करहितं **अजरममृतम्**–जरामरणशून्यम् **अभयम्** अकुतोभय **परं** सर्वकारणत्वेन सर्वोत्कृष्ट ब्रह्म च प्राप्नोतीत्यर्थ ॥ ७ ॥

अस्य सदर्भस्य परमात्मपरत्व भगवता बादरायणेन प्रतिपादितम् । अत्र हि पृथिव्यन्तरिक्षप्राय(क्षब्रह्मलोक) पाठात् **ब्रह्मलोक**शब्दस्य चतुर्मुखलोकवाचितया तद्गतेनेक्ष्यमाणत्वस्य चतुर्मुख एव सभवाच्चतुर्मुख इति पूर्वपक्षे प्राप्ते, 'ईक्षतिकर्म व्यपदेशात् स ' इति सूत्रेण सिद्धान्तितम् । पुरिशय पुरुषमीक्षत इतीक्षतिकर्मतया व्यपदिश्यमान परमात्मा, *शान्तत्वाजरत्वामृतत्वादिपरमात्मासाधारणधर्मव्यपदेशादित्यर्थ* इति ॥

इति प्रश्नोपनिषत्प्रकाशिकाया पञ्चम प्रश्न ॥ ५ ॥

---

७ तमिति पूर्वोक्तब्रह्मलोकाभिप्रायेण पुल्लिङ्गनिर्देश. । यच्छ-ब्दद्वयतद्वाक्यद्वयस्य चकारस्य चानुपेधात् परब्रह्मणो क्रमेण निर्देशत्याशाय । यद्वेदयन्ते = य लोक पश्यन्ति, तम्, शान्तमजर पर यत् तच्चेत्यन्वयः, यत् प्रसिद्ध तच्छान्तादिरूप ब्रह्म चेति वा । *अन्वेतीत्युक्त्वा अनन्तर यत्तच्छान्तमित्याद्युक्ति लोकप्राप्त्यनन्तरभा-*वित्वस्य ब्रह्मप्राप्तौ ज्ञापनार्थेति, गत्वा चेत्युक्तम् ।

हरिः ओम्. अथ हैनं सुकेशा भारद्वाजः पप्रच्छ । भगवन्! हिरण्यनाभः कौसल्यो राजपुत्रो मामुपेत्यैनं प्रश्नमपृच्छत--षोडशकलं भारद्वाज! पुरुषं वेत्थ इति । तमहं कुमारमब्रुवम्—नाहमिमं वेद ; यद्यहमिममवेदिषम्, कथं ते नावक्ष्यमिति । समूलो वा एष परिशुष्यति, योऽनृतमभिवदति । तस्मान्नार्हाम्यनृतं वक्तुम् । स तूष्णीं

अथ हैनं सुकेशा भारद्वाजः पप्रच्छ । स्पष्टोऽर्थः । भगवन्! हिरण्यनाभः कौसल्यो राजपुत्रो मामुपेत्यैनं प्रश्नमपृच्छत ॥ हे भगवन्! हिरण्यनाभनामा कोसलदेशाधिपती राजपुत्रो मत्समीपमागत्य इमं वक्ष्यमाणं प्रश्नं कृतवान् । किमिति-'षोडशकलं भारद्वाज पुरुषं वेत्थ' इति । हे भारद्वाजेति मां संबोध्याऽऽह प्राणाद्याः नामान्ताः षोडश कला यस्य स षोडशकलः तं पुरुषं वेत्थ जानासि किमिति इत्यर्थः । तमहं कुमारमब्रुवम् 'नाहमिमं वेद ; यद्यहमिममवेदिषम्, कथं ते नावक्ष्यम्' इति । तं राजकुमारमहमेवमुक्तवान्, 'त्वदुक्तं पुरुषमहं न जानामि । यद्यहं जानीयाम्, केन हेतुना राजकुमाराय योग्याय शिष्याय न कथयिष्यामि'इति । समूलो ह वा एष परिशुष्यति, योऽनृतमभिवदति । तस्मान्नार्हाम्यनृतं वक्तुम् ।

१. नावक्ष्यमितीति इतिशब्दश्रवणात् तावदन्तमेव राजपुत्रं प्रति उक्तम् । समूलइत्यादिकं तु पिप्पलादं प्रतीति युज्यते । तदा त्वयेति भाष्ये पिप्पलादो गृह्यते, 'तं त्वा पृच्छामी'तिवत् । राजपुत्रं प्रति कथन एव तद्वाक्यस्य सम्यगुपयोग इति मन्यते चेत्, त्वयेति राजपुत्रग्रहणम् ॥ २. सोम्येति । सौम्यपदं प्रियदर्शनार्थकं प्रसिद्धम् । सोमात् ट्यण् । तथा सोम्यपदमपि यप्रत्यये तदर्थकं स्यात् (अमरसुधा) ।

रथमारुह्य प्रवव्राज । तं त्वा पृच्छामि, क्वासौ पुरुष इति ॥ १ ॥

तस्मै स होवाच । इहैवान्तःशरीरे सोम्य स पुरुषः, यस्मिन्नेताः षोडश कलाः प्रभवन्तीति ॥ २ ॥

योऽनृतं ब्रूते, स मूलेन सह सर्वतः **शुष्यति** । श्रेयोहेतुभूतं पुण्यं सवासनं नश्यतीत्यर्थः । अतो मदुक्ते त्वयाऽनृतशङ्का न कार्येति भावः । **स तूष्णीं रथमारुह्य प्रवव्राज** । स राजकुमारः प्रश्नस्य प्रयोजनलेशं(?) किमप्यलब्ध्वैव रथमारुह्य **प्रवव्राज** — प्रकर्षेण गतः । अनेन लज्जा सूचिता । रथेन प्रवव्राजेत्यनेन तस्य प्रभुत्वं सूचितं भवति । **तं त्वा पृच्छामि क्वासौ पुरुष इति** ॥ तमेव षोडशकलं पुरुषं पृच्छामि त्वाम्, क्वासाविति । क प्रदेशे तिष्ठतीत्यर्थः । अत्र आधारभूतदेश-प्रश्नद्वारा जीवो वा परमात्मा वेति निर्णयार्थोऽयं प्रश्न इति द्रष्टव्यम् ॥ १

तस्मै स होवाच । स्पष्टोऽर्थः । **इहैवान्तःशरीरे सोम्य स पुरुषः, यस्मिन्नेताः षोडश कलाः प्रभवन्ति** ॥ हे **सोम्य** प्रियदर्शन ! स पुरुषः **इहैवान्तःशरीरे** । वर्तत इति शेषः । अनेन परि-

---

२. अत्र वक्ष्यमाणं प्राणादिकलाग्रहणेन षोडशकलत्वं जीवे विवक्षितम् । छान्दोग्ये (४-४) सत्यकामं प्रति षोडशकलब्रह्मविद्या काचिदुपदिष्टाऽस्ति, यत्रान्यादृशं षोडशकलत्वं ब्रह्मण एव । बृहदारण्यके (३-५-१५) चन्द्रवत् पुरुषस्य षोडशकलत्ववर्णनावसरे, 'तस्य वित्तमेव पञ्चदश कलाः, आत्मैवास्य षोडशी कला' इति जीवस्यान्यादृशं षोडशकलत्वमुक्तम् । एकादशेन्द्रियाणि, पञ्च भूतानीत्येवंभूतशरीरविशिष्टतया जीवे षोडशकलत्वकथनमप्यद्वैतमत इवास्मन्मतेऽपि सांप्रदायिकम् भाष्यव्याख्यादौ दृष्टत्वात् ।

स ईक्षांचक्रे । कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि, कस्मिन् वा प्रतिष्ठिते प्रतिष्ठास्यामीति ॥ ३ ॥

च्छिन्नप्रदेशमात्राधारत्वोक्त्या जीव इत्युत्तरमुक्तं भवति । ननु जीवस्यैव कथं षोडशकलत्वम् षोडशकलाधारत्वतत्स्रष्टृत्वयो जीवापेक्षया परमात्मन्येव पुष्कलत्वादित्याशङ्कयाऽऽह-**यस्मिन्नेताः षोडश कलाः प्रभवन्ति । यस्मिन् पुरुषे एताः** वक्ष्यमाणा प्राणाद्या नामान्ता षोडश कला स्वसंसर्गप्रयुक्तसुखदुःखादिभोगाख्यमुपकारं कर्तुं **प्रभवन्ति,** समर्था भवन्तीत्यर्थः । ततश्च षोडशकलाभोक्तृत्वमेव षोडशकलत्वम् । तच्च जीवस्यैवेति भावः ॥ २ ॥

ननु षोडशकलासर्गहेतुत्वे जीवपरमात्मनोरविशिष्टे तद्धोक्तृत्वं जीवस्यैव, न परमात्मन इत्यत्र किं नियामकमित्यत्राऽऽह-**स ईक्षांचक्रे-कस्मिन्नहमुत्क्रान्ते उत्क्रान्तो भविष्यामीति ; कस्मिन् वा प्रतिष्ठिते प्रतिष्ठास्यामीति** ॥ "सोऽध्यक्षे तदुपगमादिभ्यः" इति भाष्ये, "प्रतिष्ठा च जीवेन सह श्रूयते कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि, कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति" इत्युक्तत्वात् इदं वाक्यं जीवाभिसन्धिप्रकारप्रदर्शनपरम् । मदुत्क्रान्तिप्रतिष्ठासहभूतोत्क्रान्तिप्रतिष्ठः को वेति पर्यालोचितवानित्यर्थः । ततश्च स्वोपकाराभिसन्धिपूर्वकं जीवस्य प्राणादिस्रष्टृत्वात् तद्भोक्तृत्वं सम्भवति । परमात्मनस्तु—"न च मां तानि कर्माणि निबध्नन्ति धनंजय । उदासीनवदासीनमसक्तं तेषु कर्मसु", "न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा" इत्युक्तरीत्या स्वोपकाराभिसन्धिपूर्वकस्रष्टृत्वाभावान्न तस्य षोडशकलाभोक्तृत्वमिति भावः ॥ ३ ॥

स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियम् मनोऽन्नमन्नाद्वीर्यं तपो मन्त्राः कर्म लोका लोकेषु च नाम च ॥ ४ ॥

स यथेमा नद्यस्स्यन्दमानास्समुद्रायणास्समुद्रं प्राप्यास्तं गच्छन्ति, भिद्यते तासां नामरूपे, समुद्र इत्येवं प्रोच्यते—एवमेवास्य

स प्राणमसृजत, प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनः अन्नमन्नाद्वीर्यं तपो मन्त्राः कर्म लोकाः लोकेषु [च] नाम च ॥ सः जीव एव पर्यालोच्य प्रथमतः स्वोत्क्रान्तिप्रतिष्ठासहभूतोत्क्रान्तिप्रतिष्ठं मुख्यप्राणं सृष्टवान् । तस्मादूर्ध्वम् आस्तिक्यबुद्धिम्, पञ्च महाभूतानि, वागादीन्द्रियम्, मनः, व्रीह्यादिरूपमन्नम्, तदायत्तं शरीरेन्द्रियसामर्थ्यम्, शरीरशोषणादिलक्षणं तपः, ऋग्यजुःसामादीन् मन्त्रान्, ज्योतिष्टोमादीनि कर्माणि, कर्मफलभूतान् स्वर्गादीन् लोकान्, तेषु स्वर्गादिलोकेषु नामानि[च॰] सृष्टवानित्यर्थः । यद्यपि षोडशकलास्रष्टृत्वं परमात्मन एव, तथाऽपि तद्धेतुभूतादृष्टारम्भककर्मकर्तृत्वेन अयं स्रष्टृत्ववाद इति द्रष्टव्यम् । ततश्च स्वभोगोपकारिकाः षोडशापि कलास्तद्धेतुभूतादृष्टारम्भककर्माणि कृत्वा सृष्टवान् । अतस्तद्धेतुकृतया षोडशकलत्वं जीवस्येति यावत् ॥ ४ ॥

षोडशकलत्वं जीवस्योपपाद्य परमात्मन ईदृक्त्वाभावादकलत्वम्, तद्द्वारा मुमुक्षुवेद्यत्वं चोपपादयति—स यथेमा नद्यः स्यन्दमानाः समुद्रायणाः समुद्रं प्राप्यास्तं गच्छन्ति; भिद्यते तासां नामरूपे; समुद्र इत्येवं प्रोच्यते । यथा प्रस्रवन्त्यो गङ्गाद्या नद्यः समुद्रायणाः—अयनशब्देनाऽऽधारत्वमुखेनाऽऽत्मत्वमुच्यते— समुद्रा -

परिद्रष्टुरिमाष्षोडश कलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति, भिद्येते चासां नामरूपे, पुरुष इत्येवं प्रोच्यते । स एषोऽकलोऽमृतो

त्मिकाः समुद्रात्पृथक्स्थितिप्रतिपत्तियोग्या भूत्वा समुद्रं प्राप्य अस्तं गच्छन्ति अदर्शनं यान्ति, न तु समुद्रे वृष्ट्यादिलक्षणं विकारमुत्पादयितुं प्रभवन्ति । तासां च गङ्गायमुनादीनि नामानि यानि, यानि च शुक्लकृष्णादीनि रूपाणि प्राक्तनानि, तानि भिद्यन्ते तत्प्रवेशानन्तरं न भवन्ति । नामान्तरं रूपान्तरञ्च भवतीत्यर्थः । तदेव दर्शयति—समुद्र इत्येवं प्रोच्यत इति । तत्र प्रविष्टं नदीजातं सर्वं समुद्र इत्येवं प्रोच्यते, न तु गङ्गा, यमुनेति । स यथा । स दृष्टान्तो यथेत्यर्थः ।

एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति ; भिद्येते चाऽऽसां नामरूपे ; पुरुष इत्येवं प्रोच्यते । स एषोऽकलोऽमृतो भवति । एवमेव अस्य परिद्रष्टुः अनुभवितुर्भोक्तुर्जीवस्य भोगोपकरणभूता इमाः षोडशापि कलाः निरुपाधिकपुरुषशब्दवाच्यं वासुदेवं प्राप्यास्तं गच्छन्ति । यथा शिलातलं प्राप्य क्षुरधाराः कुण्ठीभवन्ति, तथा भोगबाधिका न भवन्तीत्यर्थः । तत्र हेतुमाह—पुरुषायणा इति । पुरुषसंकल्पाधीनस्वरूपस्थितिप्रवृत्तिका इत्यर्थः । आसां कलानां जीवविषये भोग्यभोगस्थानभोगोपकरणत्वादिनामरूपभेदवत् परमात्मविषये भोगस्थानत्वादिनामरूपे न स्तः । तदेव दर्शयति पुरुष इत्येवं प्रोच्यत इति । पुरुषापृथक्सिद्धिप्रतिपत्तिकतया पुरुष इत्येवं प्रोच्यते ; न तु तद्विभत्वादिना तत्कलादित्वेन प्रोच्यते । तस्मात् परमात्मनः कलाभोक्तृत्वाभावात् अकल इत्येवोच्यते । अत एवामृतश्च ; मरणस्य भोक्तृत्व-

भवति । तदेष श्लोक ॥ ५ ॥

अरा इव रथनाभौ कला यस्मिन् प्रतिष्ठिता ।
त वेद्य पुरुष वेद मा वो मृत्यु परिव्यथा इति ॥ ६ ॥

तान् होवाच-एतावदेवाहमेतत् पर ब्रह्म वेद, नात परमस्तीति ॥७॥

ते तमर्चयन्त त्व हि न पिता योऽस्माकमविद्याया पर पार तारयसीति ॥

रूपकलासबन्धाधीनत्वादिति भाव । **तदेष श्लोकः ।** तत् परमात्मस्वरूपमधिकृत्य वक्ष्यमाण श्लोक प्रवृत्त इत्यर्थ ॥ ५ ॥

अरा इव रथनाभौ कला यस्मिन् प्रतिष्ठिताः । यस्मिन् *प्रतिष्ठिता =पदात्मिका यदुपादानिका इत्यर्थ । शिष्ट स्पष्टम् ।* **त वेद्य पुरुष वेद ।** यथावत् तमेव पुरुष मुमुक्षुर्वेद्यमवगच्छत । ब्रह्मज्ञानस्य फलमाह—**मा वो मृत्युः परिव्यथाः ।** ब्रह्मज्ञान युष्माक परितो व्यथा मृत्युर्मा कार्षीदित्यर्थ ॥ ६ ॥

तान्—होवाच एतावदेवाहमेतत् पर ब्रह्म वेद । नातः परमस्तीति । *तान् सुकेशादीन् षडपि शिष्यान् प्रति एतदुवाच*—अहमेतावदेव पर ब्रह्म जानामि । परब्रह्मविषये ममैतावदेव ज्ञानम् । इतोऽधिक नास्तीत्यर्थ ॥ ७ ॥

ते तमर्चयन्त , 'त्व हि नः पिता, योऽस्माकमविद्यायाः पर पार तारयसि इति । ते षडपि त पिप्पलादम्, त्वमस्माक ससाराकूपारतीरप्रापकतया पिताऽसि । तस्मात् त्वत्तो जन्मैव श्रेष्ठ जन्म , "स हि विद्यातस्तं जनयति । तच्छ्रेष्ठं जन्म" इति श्रवणात् **इति**

आदौ पटसु सुकेशादिष्वन्त्ययो कथने परम् ।
चकारो न कृत , किन्तु चतुर्णामेव , तत् कुत ॥ १ ॥

नमः परमऋषिभ्यो नमः परमऋषिभ्यः ॥ ८ ॥

॥ इति षष्ठः प्रश्नः ॥

॥ प्रश्नोपनिषत् समाप्ता ॥

॥ शुभमस्तु ॥

अर्चयन्तः पूजयन्तो बभूवु ॥ नमः परमऋषिभ्यो नमः परमऋषिभ्यः ॥ उत्तरशान्तिस्थाने इदम् । वाक्याभ्यासः उपनिषत्समाप्त्यर्थः ॥

नूनं संभूयगामित्वं चतुर्णां तेन गम्यते ।
कबन्धिभार्गवौ स्यातामुपसद्यैव संगतौ ॥ २ ॥
प्रसिद्ध्यतिशयं यद्वा चकारो गमयेदिह ।
प्रश्निष्ठता हि कौसल्ये कण्ठोक्ता गुरुणा ततः ॥ ३ ॥
तदूर्ध्वप्रश्नकर्तॄणां सा कैमुत्यनयाद् भवेत् ।
हिरण्यनाभो राट्पुत्रो विशेषार्थबुभुत्सया ॥ ४ ॥
सुकेशसविधं प्राप्त इति षष्ठे तदुक्तितः ।
आदिमो ब्रह्मविद्यायां प्रसिद्ध इति गम्यते ॥ ५ ॥
विज्ञानतारतम्येन षड्विधाः क्रमात् ततः ।
व्युत्क्रमः प्रश्नकाले तु न्यूनत्वे पूर्वशिक्षिते ॥ ६ ॥
अभिन्नप्रश्नलभ्यार्थज्ञानं सर्वो भजेदिति ।
उपक्रमावसानाभ्यां सर्वं सर्वार्थमिष्यताम् ॥ ७ ॥
अधीयानोऽपि बुध्येत क्रमेऽत्रैवाखिलं सुखम् ।
अथेदं प्रश्नषट्कार्थसांगत्यं किञ्चिदुच्यते ॥ ८ ॥
अस्ति प्रजापतिः कश्चित् स इच्छति सृजत्यपि ।
प्रजाः ; प्रजा समस्ताऽपि रयिप्राणमयी भवेत् ॥ ९ ॥
मूर्त्यंशो रयिरित्युक्तः परांशः प्राण उच्यते ।
समप्राणाक्षोपकरणो यद्ध आत्मा स मन्यताम् ॥ १० ॥

न च, 'एतादेवाहं परं ब्रह्म वेद, नातः परमस्ती'ति षोडशकलजीवातिरिक्तपरब्रह्मनिषेध. किं न स्यादिति वाच्यम् । 'अधिकं तु भेदनिर्देशात्' इत्यादिभिर्विरोधप्रसङ्गात् । तथा हि स्मृतिपादे— 'तत्त्वमसि', 'अयमात्मा ब्रह्म' इत्यनेनेतरस्य जीवस्यैव ब्रह्मभावोपदेशात् सार्वज्ञ्यसत्यसंकल्पत्वादियुक्तस्य अनन्तदुःखाकरं स्वानर्थवहं जगत् सृजतो जीवरूपस्य ब्रह्मणः आत्मनो हिताकरणाहितकरणादयो दोषाः प्रादुःष्युरिति, 'इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः' इति सूत्रेण पूर्वपक्षं कृत्वा, 'अधिकं तु भेदनिर्देशात्', 'अश्मादिवच्च तदनुपपत्तिः'

सृष्टिश्च भुक्तिमुक्त्यर्था स्रष्टा सर्वात्मकः परः ।
इत्थं प्रजासृष्टिहेतुप्रश्नमाद्यं समादधात् ॥ ११ ॥
सत्स्वक्षादिषु जीवस्य प्राणशब्देन वेदनम् ।
प्राणश्रैष्ठ्यप्रयुक्तं स्यादिति तत् पृच्छ्यते ततः ॥ १२ ॥
सर्वेषां धारकत्वेऽपि मनोवाक्छ्रोत्रचक्षुषाम् ।
प्रकाशकत्वं प्राधान्यं प्राणस्य तु परिष्कृता ॥ १३ ॥
प्रकाशकत्वं ज्ञानाक्षेष्वस्ति यन्मास्तु तत्परम् ।
"प्रकाशयन्ते कतरे" इत्येतत्, नोत्तरे हि तत् ॥ १४ ॥
प्रकाशकत्वं यत् पृष्टं केषु चित् कतरोक्तितः ।
उत्तरे स्तावकत्वं तु विस्तृतम्, तेन तद् भवेत् ॥ १५ ॥
वैतुल्याद् वाङ्मनश्चक्षुःश्रोत्रवत् प्राणनिघ्नता ।
अन्येषां स्यात् चतुर्णादिस्तावद्रूपत्वे त इत्यतः ॥ १६ ॥
अथ प्राणविभागादिप्रश्नः, तस्योत्तरेण तु ।
'अपानादेर्वैशिष्ट्यस्य सत्त्वात् प्राणोऽधिकः कथम्' ॥ १७ ॥
इत्याशङ्काऽपनुद्येत तत्र प्राणांशतोक्तितः ।
व्यष्टौ नित्यश्लिष्टताञ्च प्राणैर्जीवस्य शंसितुम् ॥ १८ ॥

इति द्वाभ्यां सूत्राभ्यां सिद्धान्तितम् । तुशब्दः पूर्वपक्षं व्यावर्तयति । ब्रह्म प्रत्यगात्मनः अधिकं भिन्नम् । कुतः ? भेदनिर्देशात् । 'य आत्मनि तिष्ठन्नात्मनोऽन्तरः', 'पृथगात्मानं प्रेरितारञ्च मत्वा', 'स कारणं करणाधिपाधिपः', 'तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्योऽभिचाकशीति,' 'ज्ञाज्ञौ द्वावजावीशनीशौ', 'प्राज्ञेनाऽऽत्मना संपरिष्वक्तः', 'प्राज्ञेनात्मनाऽन्वारूढः', 'अस्मान् मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया संनिरुद्धः', 'प्रधानक्षेत्रज्ञपतिर्गुणेशः', 'नित्यो नित्यानां चेतनश्चेतनानाम्' इत्यादिभिर्विविधैर्भेदनिर्देशात् । किञ्च यथा अश्मलोष्टादीनामखिर-

---

उत्पत्त्यायतिचिन्त्यैपामत्र प्राणेषु पञ्चसु ।
चक्षुरादिस्थानभेदात् कार्यभेदः प्रदर्शितः ॥ १९ ॥
आदित्यपृथिवीव्योमवायुतेजस्सु च क्रमात् ।
प्राणापानसमानाख्यव्यानोदानात्मतोक्तिः ॥ २० ॥
'आदित्यादिर्हि बाह्योऽपि चक्षुराद्युपकारकः ।
प्राणश्रेष्ठ्यं कथं तस्मात्' इति शङ्काऽपि शाम्यति ॥ २१ ॥
[पञ्चभूतमयादित्याद्यन्तःस्थस्वांशयोगतः ।
प्राणादिः शक्तिकृत् चक्षुरादेरित्यादि भाव्यताम् ॥ २२ ॥
ऐतरेयेऽपि च प्रोक्ता प्राणस्यादित्यरूपता ।
अत्राकेऽयकाशस्य कुक्षावावश्यकत्वतः ॥ २३ ॥
आकाशस्य समानेन संबन्धः ; प्रायणे तु यत् ।
ऊर्ध्वगामि स्वभावेन तेजो मुख्यम् , तदिष्यते ॥ २४ ॥
तेनोदानस्य संबन्धः, पाते त्वापोऽधिका मताः ।
भूतपञ्चकसंसर्गेऽप्येवमेकस्य मुख्यता] ॥ २५ ॥
प्रशास्यैवमथो तुर्ये, 'स प्राणो मनसेन्द्रियैः ।
आत्माधारः स आत्मा च पराधार' इति ब्रुवन् ॥ २६ ॥

हेयप्रत्यनीककल्याणैकतानब्रह्मैक्यानुपपत्तिः, एवमखिलहेयास्पदस्य जीवस्य अनादरेण ब्रह्मणैक्यानुपपत्तिरिति सूत्रद्वयार्थः । एवम् "अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात्", "भेदव्यपदेशाच्चान्यः," "सुषुप्त्युत्क्रान्त्योर्भेदेन" "उभयेऽपि हि भेदेनैनमधीयते" इत्यादिन्यायाश्च कुप्येयुरित्यलं प्रपञ्चेन ॥ ८ ॥

क्षेमाय यः करुणया क्षितिनिर्जराणा
भूमावजृम्भयत भाष्यसुधामुदारः ।
वामागमाध्वगवदावदतूलवातो
रामानुजः स मुनिराद्रियतां मदुक्तिम् ॥

इति श्रीमत्तातार्यचरणारविन्दचञ्चरीकस्य वात्स्यानन्तार्यपादसेवासमधिगतशारीरकमीमांसाभाष्यहृदयस्य परकालमुनिपादसेवासमधिगतपारमहंस्यस्य श्रीरङ्गरामानुजमुनेः कृतिषु प्रश्नोपनिषत्प्रकाशिका ॥

देहेन्द्रियमनःप्राणधीभ्योऽन्यं ज्ञानरूपिणम् ।
स्वमात्मानं प्रजाध्यक्षपरमात्मवशं जगौ ॥ २७ ॥
त्रिमात्रप्रणवाद्यैश्च परोपासनमुच्यते ।
पञ्चमे मुक्तये, यस्मादन्यदा फलमन्यथा ॥ २८ ॥
षोडशापि कलाः प्रोच्य षष्ठे जीवञ्च तद्वशम् ।
अकलं पुरुषं ब्रह्म परमाह प्रजासृजम् ॥ २९ ॥
ईशाद्युपनिषद्भाष्यपरिष्कारविधायिना ।
प्रश्नोपनिषदो भाष्यमित्थमुदारं परिष्कृतम् ॥ ३० ॥
॥ श्रीलक्ष्मीहयवदनपरब्रह्मणे नमः ॥

इति श्री वात्स्य वीरराघवाचार्यकृत प्रश्नोपनिषद्भाष्यपरिष्कारः ॥

॥ शुभमस्तु ॥

प्रश्नोपनिषदर्थसंग्रहकारिकाः

१. सुकेशशैब्यसौर्यायण्याश्वलायनभार्गवाः ।
कबन्धी चेति षट् प्राप्ताः पिप्पलादमृषीश्वरम् ॥

२. ततोत्तरोत्तरस्येह प्रश्नस्सह समाधिना ।
पूर्वं पूर्वं निबद्धोऽस्ति षट् प्रश्नाः प्रश्नगास्ततः ॥

३. कुतः प्रजाः प्रजायन्त इति प्रश्ने कबन्धिनः ।
प्रजाकामाद् रयिप्राणसृजो जाताः प्रजापतेः ॥

४. अन्नरूपात् प्रजाः, यासां संसरन्तीन्दुसंगताः ।
शुद्धास्त्वादित्यगा ब्रह्म यान्तीत्याह स्म तं गुरुः ॥

५. भार्गवं स्वाह देवेषु महाभूतेन्द्रियात्मसु ।
प्रजाधृत्सु वरिष्ठत्वं प्राणस्यैतत्स्तवश्च तैः ॥

६. उत्पत्तिमागतिं देहे स्थानान्येतत्क्रियास्विदाम् ।
आदित्याद्यात्मताश्चाह प्राणस्यैवाश्वलायनम् ॥

७. सुप्ती स्वपन्ति जाग्रन्ति स्वप्निनं सुखिनं तनौ ।
परात्मनि प्रतिष्ठानं ज्ञातुः सौर्यायणिं जगौ ॥

८. शैब्यं त्वेकद्वित्रिमात्रतारोपास्तौ गतिः क्रमात् ।
नृलोकपुनरावर्तिलोकमोक्षपदेष्विति ॥

९ स षोडशकलो यस्मिन् प्रभवः प्राणादयः कलाः ।
अस्तं गच्छन्त्यमू पुंसि पर इत्याह चादिमम् ॥

१०. इत्थं प्रश्नोपनिषदः षट्सु प्रश्नेषु वर्णिताः ।
स्रष्टा, प्राणोऽस्य भूमा सुप्रतिष्ठा प्रणवः कलाः ॥

प्रश्नमन्त्रसूची

अरा इव.	२-६.	प्रजापतिश्चरसि.	२-७.
अरा इव.	६ ६.	पञ्चपादं.	१-११.
इन्द्रस्त्वं प्राण.	२-९.	प्राणस्येदं	२-१३.
उत्पत्तिमायतिं.	३-१२.	यदात्वमभि.	२ १०.
ऋग्भिरेत.	५-७.	या ते तनूः	२-१२.
एषोऽग्नि-.	२-५.	विज्ञानात्मा.	४-११.
तिस्रोमात्राः.	५ ६.	विश्वरूपं.	१-८.
देवानामसि.	२ ८.	व्रात्यस्त्वं.	२-११.

प्रमाणाकरः

अशरीरं वाव	छ. ८-१२-१
अस्मान् मायी	श्वे. उ ४
आदित्याचन्द्रमसं	छा. उ. ४-१५-५
इममात्मानं	बृ. उ. ६-३-३८
ईक्षतिकर्मव्यपदेशात्	ब्र. सू. १-३-१२
एतस्माज्जायते	मु. उ. २-१-३
एवमेवेममात्मानं	बृ. उ. ६-३-३८
किं प्रजया	बृ. उ. ६-४-२२
ज्ञाज्ञौद्वौ	श्वे उ. १
तद्यथारथस्यारेषु	कौ. मत. ६१
तद्विष्णोः परम	सुबा. ६.

तमुत्क्रामन्तं	बृ. उ. ६. ४. २
तयोरन्यः	मु. ३. १. १. श्वे. उ. ४
तेजसाहितदा	छा. उ. ८-६-३
द्वे आहवनीये	! तै. ब्रा. २-१-३
धूमोरात्रिः	गी. ८-२५
नित्योनित्यानाम्	श्वे. उ. ६. कठ. ५-१३
पृथगात्मानम्	श्वे. उ. २-६
प्रधानक्षेत्रज्ञपतिः	श्वे. उ. ६
प्राज्ञेनात्मनाऽन्वा	बृ. उ. ६-३-३५
प्राज्ञेनात्मनासं	बृ. उ. ६-३-२!
प्राणस्तेजसि	छा. उ. ६-८-६
भगवानिति शब्दोऽयम्	! वि. पु.
भूतान्तरसंसृष्टमेवतेजः	श्रीभा. ४-२-६
मनस्यन्यत्	हितोपदेश
मामुपेत्यतु	गी. ८-१६
य आत्मनि तिष्ठन्	बृ. माध्यं. ३-७-२९
य इमेग्रामे	छा. उ. ५-१०-३
वाङ्मनसि	छा. उ. ६-८-६
सकारणं करणाधिप	श्वे. उ. ६
सतासोम्य	छा. उ. ६-८-१
सोऽध्यक्षे	ब्र. सू. ४-२-४

विषयाः

सुकेशादीनां षण्णां पिप्पलादोपसदनम्	पु	167
प्रजापतिकर्तृकरयिप्राणसृष्टिः		169
प्रजापतेस्संवत्सरात्मकत्वम्		174
एतद्ब्रह्मलोकविरजोब्रह्मलोकाधिकारिविवेचनम्		175
प्रजाशरीरधारकादिनिरूपणम्		182
प्राणस्य वरिष्ठत्वम		184
वागादिकर्तृकप्राणस्तुतिः		185
प्राणोत्पत्तिः, इन्द्रियैस्सह शरीरे प्राणप्राप्तिश्च		190
प्राणस्य पञ्चविधत्व कार्यभेदश्च		192
प्राणस्य वाह्याध्यात्मिकभेदः		195
शरीरे जाग्रत्स्वप्नविवेक·		198
प्राणादिविलक्षणजीवात्मनिरूपणम्		203
जीवात्मविलक्षणपरमात्मनिरूपणम्		205
प्रणवे एकद्वित्रिमात्रता		208
तदुपासनभेदेन ऐहिकामुष्मिकमोक्षरूपफलभेदः		215
जीवस्य षोडशकलत्वनिरूपणम्		216
परमात्मनस्तद्विलक्षणत्वम्		217
कतिपयविषयविशेष विमर्शः		221

पुरुषनामानि

१. सुकेशा भारद्वाज
२. शैब्य सत्यकाम
३. सौर्यायणी गार्ग्य
४. कौसल्य आश्वलायन
५. भार्गवो वैदर्भि.
६. कबन्धी कात्यायनः
७. भगवान् पिप्पलाद·
८. हिरण्यनाभः कौसल्यो राजपुत्रः

अपूर्वपदानि

रयि:	पु. 169	सप्तचक्रे	177
प्राण:	169, 170, 201	षडरे	177
आदित्य:	169, 170	वह्नितम:	187
वैश्वानर:	172	आयस्य	188
पितृयाण:	174	वासोवृक्षम्	203
पुरीषिणम्	177	जीवघनात्	210
पञ्चपादम्	177	षोडशकल:	212
द्वादशाकृतिम्	177	रथनाभि:	217
उपरे	177	समान:	201

शारीरकविचार:

वैश्वानराधिकरणभाष्यम् 172, 226.	१-२-
सर्वव्याख्यानाधिकरणश्रुतप-168	१-४-८
सोध्यक्षइत्यधिकरणभाष्यम् १७ 196	४-२-३
४. २. ५ ६. श्रीभाष्यम्	
वाङ्मनसिदर्शनात्	४-२-१
भूतेषु तच्छ्रुते:	४-२-५
नैकस्मिन् 196	४-२-६
ईक्षतिकर्माधिकरणविचार: 211	१-३-४
इतरव्यपदेशाधिकरणविचार: 219	२-१-७